भिः १० स्तोत्रैश्चाराधयेद्देवंव्रतकृद्वाग्यतः शुचिः देवस्यपुरतस्थित्वास्तुंडिलंचतुरस्रकं ११
अरत्निमात्रंतत्राग्निं स्थापयेद्धव्यमार्गतः आज्यभागांतपर्यंतंकृत्वापुरुषसूक्तं १२ चा
रूणाचरुणाश्चाघृतेनजुहुयात्ततः एकवारंद्विवारंवाथशक्तितः १३ होमंकुर्यात्त्रय
स्त्रेनसर्वपापनिवृत्तये प्रायश्चित्तादिकंसर्वंगृह्योक्तविधिनाचरेत् १४ समाप्यहोमंविधिव
द्दक्षांतसूक्तानजपेत्ततः पश्चाद्देवंसमागत्यपुनःपूजांप्रकल्पयेत् १५ ततोपवासंकृत्वा
तु अर्चयेद्भक्तितत्परः पौर्णिमास्यांनिराहारः स्थित्वादेवंतवाग्र्यां १६ ओंस्वामिपुंज
रीकाक्षपरेन्हिशरणंभव इतिविज्ञप्यदेवायअर्घोदत्वातथैदेवं १७ ज्ञातुभ्यांप्रभुव ॥१३॥

नींगत्वारक्तपुष्पजलान्वितं क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भवगृहाणार्घ्यमयादत्तंरोहि
ण्यासहितःप्रभो १८ एवमर्घ्यंप्रदायेंदोःप्रार्थयेत्प्रयतांजलिः निष्टप्तपूर्वमुखोभूत्वापश्चा
न्निदुंचसत्तम १९ नमःसुधांशवेतुभ्यंद्विजराजायतेनमः रोहिणीपतयेतुभ्यंलक्ष्मी
भ्रत्रेनमोनमः २० ततोजागरणंकुर्यात्पुराणश्रवणादिभिः जितेंद्रियोवशीशुद्धःपर्वे
ताल्पवर्जितः २१ ततःप्रातःप्रकुर्वीतआचारंचयथाविधिः पुनःसंपूजयेद्देवंयथा
विभवविस्तरं २२ ब्राह्मणान्भोजयेत्पश्चाच्छक्तितःप्रयतोनरः बंधुभृत्यादिभिःसार्धंस्वयं
भुंजीतवाग्यतः २३ एवंपुष्यादिमासेषुपौर्णिमास्यामुपोषितः अर्चयेद्भक्तिसंयुक्तोना
रायणमनामयं २४ एवंसंवत्सरंकृत्वाकार्तिकीपौर्णिमादिनेउद्यापनंप्रकुर्वीतविधानेन
वदामिवः २५ मंडपंकारयेद्दिव्यंचतुश्चुरस्रंसुमंडलं शोभितंपुष्पमालाभिर्वितानंध्वज
राजितं २६ वह्निदीपसमाकीर्णंकिंकिरवशोभितं दर्पणैश्चामरैश्चैवकलशैश्चसमावृतं
७ तन्मध्येसर्वतोभद्रंपद्मवर्णविराजितं कृत्वाजलान्वितंकुंभंन्यसेत्तस्योपरिद्विजः २८

निधायकुंभंवस्त्रेणवेष्टितेनानिशोभितेहेमनालंवाराजतेचापितथाताम्रेणवेदिजाः॥२९॥
लक्ष्मीनारायणंदेवंकृत्वातस्योपरिन्यसेत्पंचामृतेनस्नाप्यगंधपुष्पादिभिःक्रमा ॥नार॥
त्॥३०॥भक्ष्यभोज्यादिनैवेद्यैःपूजयेन्नियतेंद्रियः॥जागरंचतथाकुर्यात्सम्यक्श्रद्धास
मन्वितः॥३१॥ततःप्रातस्तुविधिवत्सर्ववद्विहुमर्चयेत्॥आचार्यायप्रदातव्यादक्षिणान्विता॥३२॥ब्राह्मणान्भोजयेच्छक्त्याविभवेसत्यभावाधितंतिलदानंप्रकुर्वीतय
थाशक्त्यासमाहितः॥३३॥इहभुक्त्वामहाभोगान्पुत्रपौत्रैःसमावृतःसर्वपापवि
निर्मुक्तःकुलायुतसमन्वितः॥३५॥प्रयातिविष्णुभवनंयोगिनामपिदुर्लभं॥३६॥॥॥
इतिश्रीबृहद्भारदीयेमहापुराणेसप्तदशोध्यायः॥१७॥॥॥सूतउवाच॥॥अन्य
द्वंप्रवक्ष्यामिध्वजारोहणसंस्कृतं॥ब्राह्मणाक्षत्रियविशांशूद्राणांश्चैवसत्तमाः॥स
र्वदुःखोपशमनंसंसारच्छेदकारणं॥यःकुर्याद्विष्णुभवनेध्वजारोपणमुत्तमं॥संपू
ज्यतेविरिंचाद्यैःकिमन्यैर्बहुभाषितैः॥हेमभारसहस्रंतुयोदद्याच्चकुटुंबिने॥सन् ॥७४॥

र्वेष्टमानंस्याध्वजारोपणकर्मिणः॥ध्वजारोपणतुल्येस्याद्गंगास्नानमुत्तमं॥४॥अथवातु
तुलसीसेवाशिवलिंगप्रपूजनं॥अहोपूर्वमहोपूर्वमहोपूर्वंद्विजोत्तमाः॥५॥सर्वपापहरंक
र्मध्वजारोपणसंज्ञकं॥यानिसर्वाणिकर्माणिध्वजारोपणमुत्तमं॥६॥तानिसर्वाणिवक्ष्यामि
शृणुध्वंगदतोममं॥७॥कार्तिकस्यासितेपक्षेदशम्यांप्रयतोनरः॥स्नानंकृत्वाप्रयत्नेनदंतधा
वनपूर्वकं॥८॥एकाकीब्रह्मचारीचस्वयंनारायणंजपन्॥धौतांबरधरःशुद्धःसुशीनारायणप्रियः॥९॥ततःसमुत्थायस्नात्वाआचम्यचयथाविधिः॥नित्यकर्मनिवृत्त्यथश्राद्धंकृत्वासमर्च
येत्॥१०॥चतुर्भिर्ब्राह्मणैःसार्धंकृत्वास्वस्तिवाचनं॥नांदीश्राद्धंप्रकुर्वीतध्वजारोपणकर्म
णि॥११॥ध्वजस्तंभोवगायगायच्याप्रोक्षयेद्दूर्ववेष्टितं॥सूर्यंचवैनतेयंचहिमांशुंचततोर्चयेत्॥१२॥
धातारंचविधातारंपूजयेत्कुंभकद्वये॥हरिद्राक्षितगंधाद्यैःशुक्लपुष्पैर्विशोषितः॥१३॥
तोगोचर्ममात्रंतुस्थंडिलंचोपलिप्यच॥आधायाग्निंस्वगृह्योक्तआज्यभागादिकंक्रमात्॥
१४॥जुहुयाच्चपायसंचैवघृतमिश्रंततश्चरुं॥प्रथमंपौरुषंसूक्तंविष्णोरमिततेजसः॥१५॥
नतेयस्यस्वाहेत्यृषाकुतोन्तथासोमोधेनुंसमुद्धृत्यजुहुयात्तुप्रयतोद्विजाः॥१६॥सोयन्मे॥

ज्ञान जपेत्तत्र शांतिसूक्तं श्रद्धान्वितः रात्रौ जागरणं कुर्याद्विष्वक्सेनहरेः शुचिः ॥१७॥ ततः प्रातः समुत्थाय नित्यं कर्म समाप्य च गंधपुष्पादिभिर्देवं अर्चयेत्सर्ववक्रमात् ॥१८॥ ततो मंगलवाद्यैश्च शुक्लापीठेः सुशोभने नृत्यैश्च स्तोत्रपठणैर्नयेद्दिनं सुखालये ध्वजं ॥१९॥ देवस्यदक्षिणे देशे वास्तुवरं मुदान्वितः सुस्थिरं स्थापयेद्विप्रा ध्वजस्तंभं सुसंयतः ॥२०॥ गंधपुष्पाक्षतैर्दधिदर्भैर्देवं धूपैश्च भक्तितो रत्नोदकैः पंचगव्यादिसंयुक्तैः नैवेद्यैश्च हरिं यजेत् ॥२१॥ एवं देवालये स्थाप्य शोभनं ध्वजमुत्तमं ॥ प्रदक्षिणमनुव्रज्य स्तोत्रमेतदुदीरयेत् ॥२२॥ नमस्ते पुंडरीकाक्ष नमस्ते विश्वभावन नमस्ते सुरुषीकेश महापुरुषपूर्वज ॥२३॥ यतोदमखिलं जातं यत्र सर्वं प्रतिष्ठितं लयमेष्यति यत्रैवतं प्रपद्येऽहमाधवं ॥२४॥ नजानंतिपरं देवं सर्वब्रह्मादयः सुराः योगिनोयं प्रपश्यंतितं वंदे ज्ञानरूपिणं ॥२५॥ अंतरिक्षंतुयन्नाभिर्योमूर्धायस्यचैवहि पादावभूज्जगद्धात्रीं नंवंदे ज्ञानरूपिणं ॥२६॥ अंतरिक्षंतुयन्नाभिर्योमूर्धायस्यचैवहि यस्यश्रोत्रेदिशः सर्वाः यज्ञंभुर्दिनकृच्छशी ॥२७॥ तुष्टावमनुजोयेनतं वंदेब्रह्मसनातनं ॥२८॥ यन्मुखाद्ब्राह्मणाजाताः यद्बा

होरभवंनृपाः वैश्यायस्योरुतोजाताप द्भ्योरूद्रोअजायत ॥२४॥ मनसश्चंद्रमाजातोदिनकृच्चक्षुषस्तथा प्राणाद्वायुः पवनोजातोमुखादग्निरजायत ॥२५॥ पायसंगम्यमात्रेणयदंतिपुरुषंनुयं॰ स्वभावविमलंशुद्धं निर्विकारंनिरंजनं ॥२६॥ निरीक्षितायिनंदेवं अनंतमपराजितं॰ सद्भक्तवत्सलंविष्णुं भक्तिगम्यंनमाम्यहं ॥२७॥ शरीरादिनिष्फलानिनमाणींद्रियाणिच सस्सूक्ष्माणिचयेनासं नं वंदेसर्वमुखं ॥२८॥ यद्वैसपरमंधाम सर्वलोकोत्तमोत्तमं निर्गुणंपरमंसूक्ष्मं प्रणतोस्मिपुनपुनः ॥२९॥ निर्विकारमजंशुद्धं सर्वलोकैकमीश्वरं यमामनंतियोगींद्राः सर्वकारणकारणं ॥३०॥ एकोविष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ॥ त्रीन्लोकान्व्याप्यभूतात्मा भुंक्ते विश्वभुगव्ययः ॥३१॥ निर्गुणः परमानंदः समेविष्णुप्रसीदतु हृदयस्थोपिदूरस्थो मायया मोहितात्मनां ॥३२॥ ज्ञानिनांसर्वधर्मस्तुसमे॰ चतुर्भिश्च चतुर्भिश्च द्वाभ्यांपंचभिरेवच ऋग्यजुस्सामभिश्चैव पुनर्द्वाभ्यांसमे॰ ॥३३॥ ज्ञानिनांकर्मिणांचैवतथाभक्तिमतांनृणां यदिनोविश्वभुग्यज्ञसमे॰ ॥३४॥ जगद्धितार्थोयदिहाध्वरेतनौ लीलयाहरेः यमर्चयंतिविबुधासमे॰ ॥३५॥ यमामनंतिवैसंतः सर्वदानंदविग्रहं निर्गुणंचनि

राधारंसमे० ४० परमेशःपरानंदःपरात्परतरप्रभुः चिद्रूपश्चापरिच्छेयसमे०॥४१॥यइदंकीर्तयेन्नि
त्यं स्तोत्राणामुत्तमोत्तमं सर्वपापविनिर्मुक्तो विष्णुलोकेमहीयते॥४२॥अभीष्ट्वाभोविष्णुं ब्राह्मणो
श्चप्रपूजयेत्पुत्रमित्रकलत्राद्यैर्बंधुभिःसहवर्त्तते॥४३॥कुर्वंति पारणं विप्रानारायणपरा
यणाः॥अस्खलत्कर्मकुर्वंतिध्वजोत्थापनमुत्तमं॥४४॥तस्यपुण्यफलंवक्ष्येशृणुध्वंसमाहिताः एवंध्व
जश्चविप्रेंद्रयावच्चूलतिवायुना॥४५॥तावंतिपापजातानिनश्यंतिनात्रसंशयः॥महापातकयु
क्तोवायुक्तोवासर्वपातकैः॥४६॥ध्वजंविष्णुगृहंकृत्वासर्वपापेप्रमुच्यते॥यावद्दिनानिवसतिध्व
जोहरिगृहेद्विजा॥४७॥तावद्युगसहस्राणि हरिसायुज्यमश्नुते आरोपितेध्वजेदृष्ट्वायेजनं
दंतिधार्मिकाः॥४८॥तेपिसर्वाविमुच्यंते सुपपातककोटिभिः आरोपितोध्वजोविष्णुगृहंयुन्वन्
स्वकंपदं॥४९॥कर्तुःसर्वाणिपापानिधुन्वंतेनिमिषार्धतः॥शृणुष्वऋषयःपुण्यमितिहासंपु
रातनं॥५०॥सर्वपापप्रशमनं नारदेनप्रभाषितं॥आसीत्पुराकृतयुगे सुमतिर्नामभूपतिः॥
सोमवंशोद्भवः श्रीमान्ससप्तद्वीपाधिपःस्वयं॥५१॥धर्मज्ञःसत्यसंपन्नः शुचिश्चैवातिथि॥

थिप्रियः सर्वलक्षणसंपन्नः सर्वसंपद्भिरन्वितः॥५२॥सदाहरिकथासक्तः हरिपूजापरायणः
हरिभक्तिपराणांच शुश्रूषुरनहंकृतं॥५३॥पूज्येषुपूज्यानिरतः समदर्शीगुणान्वितः सर्वभूतहि
तः शांतः कृतज्ञः कीर्तिमान्नृपः॥५४॥तस्यभार्यामहाभागा सर्वलक्षणसंयुता पतिव्रतापतिप्रा
णा नाम्नासत्यमतिः स्मृता॥५५॥तावुभौदंपतीनित्यं हरिभक्तिपरायणौ॥आसतुस्मरोमहाभोगौ
सत्यसौमसरायणौ॥५६॥अंनदानरतोविप्रोवस्त्रदानपरायणो॥तडागारामवापीनांदिनसंख्याता
न्वितेतु॥५७॥सतुसत्यमतिनित्यं शुचिर्बंधुगृहेसति॥नित्यंनृत्यंतिसंतुष्टः मनोहारिंजुभाषिणी
यदासोपिराजामहाभागोद्वादसाद्वादसीदिने॥ध्वजमारोपयामासमनोरंबहुविस्तरं॥५९॥एवंह
रिपरंनित्यं राजानंधर्मतत्परं॥तस्यप्रियांसत्यवतीमेवाभिसदासुवन्॥६०॥त्रैलोक्यविजयोनाम
चदंपत्यंतेधार्मिकाः॥आययोबहुकालंसिषेवेदुष्टकामविभोजकः॥६१॥विभोजकंमुनिंश्रुत्वासमा
यांतंजनेश्वरः॥प्रत्युद्ययौसपत्नीकः एत्यानिबहुविस्तरं॥६२॥कृतातिथ्यक्रियंशांतं कृतासनप
रिग्रहंस्वीचासनगतोभूपः प्रांजलिर्मुनिमब्रवीत्॥६३॥सूतउवाच॥भगवन्कृतकृत्योस्मिवर
प्यागमनेषुचसतामागमनं संतः॥प्रशंसंतिसुखावहं॥६४॥यत्रस्यांमहतांप्रेमतत्रस्युःसर्वसंपदः

तेजः कीर्तिर्धनं पुत्रानतिप्राकुर्वि पश्चितः॥६५॥भवंतोयत्रगोछंतिममाप्यनुदिनंपुनः तत्रसंतःप्र
शंसंतिममहात्मांचरुणांप्रभो॥६६॥योमूर्ध्नेधारयेद्वेणुंमहल्लादतलोदकं॥सुस्नातःसर्वतीर्थेषुपु
ण्यवान्नात्रसंशयः॥६७॥ममपुत्राश्चदाराश्चसंपत्तिपिसमर्पिता॥ममाज्ञापयशांतात्मान्भगवन्किं
करवाणिते॥६८॥सूतउवाच॥विनयावनतंभूपंतंनिरीक्ष्यमुनीश्वरः॥स्मृत्वाकरेणराजानंप्रसृवा
चातिहर्षितः॥६९॥शिभांडउवाच॥राजन्यदुक्तंभवतावक्तुंसर्ववचोचितं॥विनयावनताःसर्वेवि
नसाहिंनसाध्यते॥७०॥परंश्रेयोभविष्यति॥७१॥धर्मश्चार्थश्चकामश्चमोक्षश्चैवक्षमातपः॥वि
नयालभतेसर्वंविनयाहिंनसाध्यते॥७१॥प्रीतोस्मितवभूपालसन्मार्गपरिवर्तिनः॥स्वस्ति
स्तुमहाभागयत्पृछामःस्तदुच्यते॥७२॥अहंणोबहवःसंतिपरिसंतुष्टिकारकाः॥त्वमथाभु
यतोनित्यंप्रजारोपणकर्मणि॥७३॥तवभार्याचिसाध्वीयानित्यंप्रजनपरायणा॥किमर्थमपित
दुःखंयथार्थंवक्तुमर्हसि॥७४॥सुमंतिरुवाच॥शृणुष्वभगवंस्सर्वंयत्पृछसिवदामितत्॥आचा
र्यैरुक्तंलोकानामायुश्चरितंमुने॥७५॥अहमासन्पुराभूद्रोमालिनिर्नामसत्तम॥कुमा
रीभिहितोनित्यंसर्वलोकाहितेरतः॥७६॥पिशुनोधर्मविद्वेषीदेवद्व्यापहारकः॥गोघ्नश्चत्रं ॥७७॥

मसहत्यैवसर्वप्राणिवधेरतः॥७७॥नित्यंनिष्ठुरवक्ताचपापोवश्यपरायणः॥किंचित्कालेत्तितो
हेवमनादृत्यमहध्वजः॥७८॥सर्वबंधुपरित्यक्तोदुःखीवनमुपागमत्॥मृगमांसाशनोनित्यंत
त्यमार्गविरोधकृत्॥७९॥एकाकीदुःखबहुलोन्यवसन्निर्जनेवने॥एकदाक्षुत्परिश्रांतोमदाद्य
र्पीपिपासितः॥८०॥जीर्णदेवालयंविल्वोरपश्यन्निजनेवने॥हंसकारंडवाकीर्णंनलसमीपेम
हत्सरः॥८१॥पर्यंतंचनपुष्पौघशोभितंनमुनीश्वर॥अपिबत्तत्रपानीयंततदेवगतश्रमः
॥८२॥उन्मूल्यबिसमश्नानिसाक्षुच्चविनिवारितः॥तस्मिंल्लीर्णालयेविल्वेनिवसंकृतवा
नहं॥८३॥शीर्षस्फुटितसंधानंतथाचाकरवंतथा॥॥पत्रैस्तृणैश्चकाष्ठैश्चगृहंसम्यङ्
तंमया॥८४॥अहमिमंश्लोकमगावंस्त्यादुपलिप्तामुनीश्वर॥तत्राहंव्याधवृत्तिस्स्थाहत्वाच
विविधान्मृगान्॥८५॥अजीवंवर्त्तनंकृत्वावत्सरांश्चविशतिं॥अथेयंप्रागतासाध्वीविंध्य
देशसमुद्भवा॥८६॥निषादकुलसंभूतानामनाकिलिसूता॥बंधुवर्गपरित्यक्तादुःखि
तातीर्णविग्रहा॥८७॥ब्रह्मन्सुतृट्परिश्रांतानशोचंतिस्वकृतांक्रियां॥दैवयोगात्समायाता

त्रमंतीनिर्जनेवने॥८८॥मीनिषाग्रीष्मतापार्ता अंतस्तापप्रपीडिता इमांदुःखवतींदृष्ट्वा
ज्ञातामेविपुलांधृषा॥८९॥मयादत्तंजलंचास्मैमांसचन्यफलंतथा विगतश्रमामाह्वब्रह्म ॥नारद॥
न्मयापृष्टाय थातथ्यं॥९०॥न्यवेदयत्स्वकर्माणितानिश्रृणुमहामुने॥स्यंकोकिलिनीनाम्ना
निषादकुलसंभवे॥९१॥दामुकस्यसुताविद्धन्न्यवसद्विंध्यपर्वते परस्वहारिणीनित्यं सर्व
वेशुन्यवादिनी॥९२॥बंधुवर्गापरित्यक्तायतोहंनवतीपतिं कांतारेविजनेब्रह्मन्मत्समीपमुपा
गता॥९३॥इत्येवंस्वकृतंकर्मसर्वमह्यंन्यवेदयत् तस्मिन्देवालयेविप्रोरहस्येकंच यं
वैमुने॥९४॥दंपतीभावमाश्रित्य स्थितोमांसासिनोतदा एकदामद्यपानेन मत्तावावांचनृ
त्यतः॥९५॥ततस्तेदयितेरात्रौमुदितोमांसभक्षणात्॥कटिवस्त्रंचदंशेप्रमत्तोमद्यसेवया
॥९६॥अथंनहर्षसंपन्नावावांसम्यक्प्रनृत्यतां॥तत्कालएवंपंचत्वंप्रभवचावयोर्मुने॥९७॥
आगतायमदूताश्चपाशहस्ताभयंकराः॥कर्षणातिनतुष्टात्माभगवान्मधुसूदन॥९८॥स्व
दूतान्प्रेषयामासमदाहरणकारणात्॥संवदस्तूमहानासीत्दूतानांतत्रसत्त ॥७८॥

मः॥९९॥मयाश्रुतंचतत्सर्वंश्रुणुधर्मविदांवरदूतास्तेदेवदेवेशशंखचक्रगदाधराः॥१००॥सहस्र
सूर्यसंकाशाःशांताकोमलभाषिणः॥भयंकरान्पाशहस्तान्दक्षिणोयमकिंकरान्॥१॥तान्तु
दिवदूतास्तेहरिनामपरायणाः॥विष्णुदूताऊचुः॥भोभोयूयंक्रूराद्युधर्षाविवेकपरिवर्जिताः॥२॥
मुंचध्वमेनोद्युष्यापोदंपतीहरिवल्लभौ॥३॥विवेकोत्रिषुलोकेषुसंपदामादिकारणं तथाविवेक
शून्यत्वमापदामादिकारणं॥४॥अपापेपापधीर्यस्यनंविद्याद्धर्मपुरुषाधमं॥पापेत्वपापधीर्यस्य
नंविद्यासुरुषाधमंस्॥५॥यमदूताऊचुः युष्माभिसत्यमेवोक्तंवेनोपातकिसत्तमौ॥इयंवैपाप
नादंड्यास्तेनेषामोहियमोकिमं वयंहियमोद्यश्रुतिप्राप्तोहितोधर्मोअधर्मस्तुविपर्ययतः॥
एतावधर्मचरितोनेष्यामोहियमांतिकं॥७॥सत्यउवाचएतच्छ्रुत्वातान्कुपितादेवदूतान्महो
ज्वलःप्रहरचुस्तान्यमभयंयन् भभातिनाद्दिगंतरः॥८॥विष्णुदूताऊचुः॥अहोकष्टंधर्मयश
मधर्मस्पृशतेमहान्सम्यक्विवेकशून्यत्वं निनंस्यापदांमहत्॥९॥प्राप्तानयविशेषेणन
रकाघाश्चतांगताः॥यूयंकिमधर्मंघापिकर्तुंपापानिचोद्यताः॥१०॥स्वकर्मक्षयपर्यंतेमहा

पातकिनोपिच निष्टेसिनरकंयूयंयावदाचंद्रतारकं ११ पूर्वसंचितपापानांनदृष्टोनिष्कृतिहरः ॥नाम॥
किमर्थंपापकर्माणि करिष्यथपुनपुनः १२ श्रुतिप्रणिहितोधर्मः सत्यंसत्यंपुनःपुनः किं
चाभ्यांचदित्तान्धर्मान् प्रवक्ष्यामोय थातथो १३ एतोपापविनिर्मुक्तो हरिशुश्रूषणोरतो हरिणागृह्यमाणोच मुंचध्वंमचिलंबथ १४ एषावैनर्त्तनंचक्रे तथोवेकोधजंभयः
अंत्यकालेविमुगृह्णेनपापविमोचितो १५ ऊर्तिकालेयन्नाम श्रुतवंतोथवेसकृत्॥
लभंतेपरमंस्थानं किमुशुश्रूषणोरताः १६ महापातकयुक्तावायुक्तावासर्वपातकैः ह
रिस्मृतिभागवद्भक्त्या लभंतेपरमांगतिं १७ यतीनांविष्णुभक्तानांपरिचार्यपरायणो दीक्षि
तोऽपिगछंतिपापिनोपि परांगतिं १८ मुहूर्तंवा मुहूर्तार्धंयस्तिष्ठेद्धरिमंदिरे सयाति
परमंस्थानं किमुशुश्रूषणोरताः १९ उपलेपनकर्त्तारोसंमार्जनपरायणो ये तोहरि
हनिःस्यं शीर्णासंधानकारणो २० जलसेचनकर्त्तारोदीपदो हरिमंदिरे कथंतेतोम
हाभागा नयिष्यथयमोनिकं २१ सूतउवाच इत्युक्त्वादेवदूतास्ते स्तुत्वापाशांस्त

दैवहिंसवाप्यावांविमानंतुगतावि प्रोः परंपदं २२ ऊचुर्वांसमीपमापन्नौदेवदेवस्य
चक्रिणः सुकृतवंतौमहाभागान्यावत्कल्पंस्थुणुष्वतत्व २३ युगकोटिसहस्राणियु
गकोटिशतानिच उषित्वाविष्णुभवने ब्रह्मलोकंसमागतौ २४ तावत्कालंचतत्रा
पिस्थित्वेंद्रपदंमागतौतत्रापितावतीभोगंभुक्त्वाभोगमनुत्तमं २५ ततःपृथिवी
शतोप्राप्तौक्रमेणमुनिसत्तम अत्रापिसंपदतुलाहरिदास्यप्रसादतः २६ अनया
सुकृतेनापिप्राप्तमेवंविधंमुने सम्यगाराधयित्वेशंभक्तिभावेन माधवं ३७ प्रा
प्स्यामीतिपरंश्रेयं इतिमेनिश्चितामतिः अवश्यंभावयत्कर्मकृतंतुसुमहत्कृतं २८
नृणांददातिविप्रेंद्र किंपुनः सम्यगर्चनात् स्तुत्वैवम्॥ एतत्सर्वंनिशम्यादौविष्वक्सेन
कमुनीश्वरः अभिनंद्यमहीपालं प्रययौतपसेवनं २९ तस्माच्छृणुध्वंविप्रेंद्रादे
वदेवस्यचक्रिणः परिचर्याच सर्वेषां कामधेनूपमास्मृतां ३० हरिदास्यापराणांच
हरिरेवसनातनः ददातिपरमंश्रेयः सर्वकामफलप्रदं ३१ यइदंपुण्यमाख्यानंस

र्यपापप्रनाशनं वाचये शृणुयाद्वापि यज्ञोरोगणापुण्यभाक् ९३२ ॥॥ ॥ इतिश्रीबृ
हन्नारदीयेपुराणेऽष्टादशोध्यायः ॥१८॥ सूतउवाच। अन्यद्व्रतं प्रवक्ष्यामि शृणुध्वं
सुसमाहिताः हरिर्विख्यातं सर्वलोकेषुदुर्लभं ॥१॥ नारीणांचनराणांच सर्वदुःखनि
वारणंधर्मार्थकाममोक्षाख्यं पुरुषार्थैकसाधनं २ सर्वाभीष्टफलंचैव सर्वकामफलप्र
दं॥ सर्वव्रतोत्तमं श्रेष्ठं सर्वकर्मफलप्रदं ३ मार्गशीर्षसितेपक्षेदशम्यांनियतेंद्रियः॥
कुर्यात्स्नानादिकंकर्म दंतधावनपूर्वकं ४ कृत्वादेवालयंसम्यक्तथायंचमहो
ध्वरान्॥ देवयज्ञोऋषियज्ञः पितृयज्ञस्तथैवच ५ नृपज्ञोब्रह्मयज्ञश्चपंचयज्ञाः प्रकी
र्तिताः एकामशीचभवेत्तस्मिन्नदिने निगृहितेंद्रियाः ६ ततः प्रातःसमुत्थायएका
दश्यांमुनीश्वर॥ स्नानंकृत्वायथान्यायं हरिंचैवार्चयेद्गृही ७ स्नापयेद्देवदेवेशं
चामृतविधानतः॥ अर्चयेत्तस्यभक्त्यागंधपुष्पादिभिः क्रमात् ८ धूपैर्दीपैश्चनैवेद्यै
स्तांबूलैश्चप्रदक्षिणैः संपूज्यदेवदेवेशमिमं व्रतमुदीरयेत् ९ नमस्तेस्तानरूपाय ॥८०

एवंपुष्पादिभिःसम्यक्देवदेवंजनार्दनं वक्ष्यमाणैर्मन्त्रैरुपचारैः समर्पयेत्

ज्ञानदायनमोस्तुते नमस्तेसर्वरूपाय सर्वसिद्धिविधायिने १० एवंप्रणम्यदेवेशंदेवदेवंजनार्द
नं वक्ष्यमाणैर्मन्त्रैरुपचारैःसमर्पयेत् ११ पंचरात्रंनिराहारोह्ययप्रभृतिकेशव स्मर
यंजगत्स्वामीप्रमाभीष्टप्रदोभव १२ एवंसमर्प्यदेवस्योपवासंजितेंद्रियः रात्रौजागर
णंकुर्यादेकास्यंव्रतीद्विजाः १३ द्वादश्यांचत्रयोदश्यांचतुर्दश्यांजितेंद्रियः पौर्णमास्यां
चकर्त्तव्यं एवंविधार्चनंद्विजः १४ एकादश्यांपौर्णमास्यांकर्त्तव्यंजागरंद्विजाः पंचामृ
तादिपूजांतुसामान्याद्विजपंचसु १५ क्षीरेणस्नापयेद्विष्णुंपौर्णमास्यांतुशर्कराः
तिलहोमंचकर्त्तव्यं तिलदानंचसत्तमाः १६ ततःषष्ठेदिनप्राप्तेनिर्वर्त्यस्वश्रमान्मि
त्रांसंप्रास्यपंचगव्येनअर्चयेत्पूर्ववद्धरिं १७ ब्राह्मणान्भोजयेत्सम्याद्विभवेसत्यवा
दितान् ततःस्वबंधुभिसंई स्वयंभुंजीतवाग्यतः १८ एवंसंवत्सरंकुर्याद्व्रतंपापप्रना
शनं पूर्वमासेमार्गशीर्षेकुर्यादुद्यापनेव्रती २० एकादश्यांनिराहारोभवेत्सर्ववदु
त्तमाः द्वादश्यांचपंचगव्यैश्च प्राशयेत्सुसमाहिताः २१ गंधपुष्पादिभिःसम्यग्देवदेवं

जनार्दनं अर्घ्यचौपायनंदद्याद्ब्रह्मणाय जितेंद्रियः॥२२ पायसंमधुसर्पिश्चघृतयुक्तंफलान्वितं॥
सवस्त्रंजलसंयुक्तंपूर्णकुंभंसदक्षिणं॥२३ घृतेनाच्छादितंकुंभंपंचरत्नसमान्वितं ददाद्ध्यात्वा ॥नार०॥
विदुषब्रह्मणायमुनाश्वराः २४ सर्वात्मन्सर्वभूतेशसर्वव्यापिन्सनातन परमान्नप्रदानेन
सुप्रीतोभवमाधव २५ नारायणनमस्तुभ्यंजगत्त्राणपरायण॥कुंभोदकप्रदानेन प्रीतोभव
वजनार्दन २६ अनेनोपायनंदत्वाब्राह्मणान्भोजयेत्ततः॥शक्तितोबंधुभिःसार्धंस्वयंभुं
जीतवाग्यतः २७ व्रतमेतत्तुयःकुर्याद्विरिंचकसंस्तवंनतस्यपुनरावृत्तिर्ब्रह्मलोकात्
कदाचन २८ एतद्व्रतंतुकर्तव्यमिच्छतापातमुत्तमं॥समस्तपापकांतारदावानलसमंहि
जाः २९ गवांकोटिसहस्राणिदत्तायस्फलमश्नुते॥तत्फलंसमवाप्नोतिएतस्मादुपवासतः३०
यस्त्वेतत्कृष्णयाद्भक्त्यनारायणपरःसदा॥समुच्यतेमहाघोरैरुपपातकोटिभिः ३१ ॥
इतिश्रीबृहन्नारदीयेपुराणेरहस्यंनामएकोनविंशोध्यायः १९॥॥॥ ॥सूतउवाच॥॥
अन्यद्व्रतांतरंवक्ष्येशृणुध्वंसुसमाहिताः सर्वपापहरंपुण्यंसर्वलोकोपकारकं २॥ ॥८१॥

आषाढेश्रावणेवापिनभाद्रपदेपिवा॥नभाद्यश्वयुजेवापिकुर्यादेतद्व्रतंद्विजाः३॥एतदन्य
तमवाप्यपिशुक्लपक्षेजितेंद्रियः॥प्रतर्दशम्यांस्नायीतदंतधावनपूर्वकं ३॥नित्यंदेवार्चनंकु
र्यान्नियतात्माजितेंद्रियः॥एकादश्यांब्रह्मचारीअधःशायीजितेंद्रियः॥४॥प्राश्नीयाच्चगव्यंचत
दिद्भुसमीपतः॥ततःप्रातःसमुत्थायनित्यकर्मसमाप्यच ५॥श्रद्धयापूजयेद्विष्णुंवशीकृ
तविवर्जितः॥विप्रैःसहितोविष्णुंअर्चयित्वायथोचितं॥६॥संकल्पंतुतथाकुर्यात्स्वस्तिवा
चनपूर्वकं मासमेकंनिराहारोव्रतस्यप्रभृतिकेशव ७॥मासांतेपारणांकुर्याद्विप्रंबहुदक्षि
णया॥तपोरूपनमस्तुभ्यंतपसांफलदायक ८॥ममाभीष्टफलंदेहिममविघ्नोनिवारय॥एवंस्
मर्यदेवस्यविष्णोर्मासंव्रतंशुभं ९॥तदाप्रभृतिमासांतंनिवसेद्धरिमंदिरे॥प्रत्यहंस्नापयेद्दे
वंपंचामृतविधानतः॥१०॥दीपंनीरांजनंकुर्याच्चास्मिन्मासेगृहेगृहे॥प्रत्यहंदंतकाष्ठेनच्य
पामार्गस्यशास्त्रया॥११॥कृत्वास्नायाच्चविधिवन्नारायणपरायणः॥तदंतेप्रयतःस्नात्वा॥
ब्रह्मणंपूर्ववदर्चयेत्॥१२॥ब्राह्मणान्भोजयेच्छ्राद्धक्तियुक्तःसदक्षिणः॥स्वयंचबंधुभिस्तांदद्युं

जीतप्रयतेंद्रियः १२ भक्त्याचदक्षिणांदद्याद्धेन्याभरणानिच। मासोपवासेनैकेन वाजपेयफलं लभेत् १४ यद्दिदृयं कृतंतस्यपौंडरीकफलंलभेत्। मासोपवासत्रितयं यः कुर्यात्संयतेंद्रियः १५ अग्निष्टोमस्ययज्ञस्यद्विगुणंफलमश्नुते चतुःकृत्वःकृतंयेन पराकंमुनिसत्तमा १६ सर्वेषा त्परमंपुण्यं अग्निष्टोमाष्टकोद्भवं पंचकृत्वाव्रतमिदं कृतंयेनमहात्मना १७ अग्निष्टोमाष्टकं पुण्यंद्विगुणंप्रमुर्यांभरः मासोपवासंषट्कृत्वाकुर्याद्यस्तुसमाहितः १८ अग्निष्टोमशतस्य ज्ञस्यफलमष्टगुणंभवेत् निराहारोयोमासंसमश्नीयात् कृत्वानशाभवेत् १९ अश्वमेधशतस्य ज्ञस्यफलमष्टगुणंभवेत् मासोपवासंयः कुर्यादष्टकृत्वोमुनीश्वराः २० नरमेधशतस्यापि ज्ञस्य फलपंचगुणंभवेत् यस्तुमासोपवासश्चनवकृत्वासमाचरेत् २१ गोमेधमखजंपुण्यं लभते द्विगुणंनरः दशकृत्वातुयः कुर्यात्पराकंमुनिसत्तमाः २२ सयातिब्रह्ममेधस्यत्रिगुणंफलं मुत्तमं एकादशपराकस्यश्चयः कुर्यात्संयतेंद्रियः २३ सर्वयज्ञफलंप्राप्यहरिसालोक्यमश्नु ते मासोपवासंयः कुर्याद्द्वादशंसंयतेंद्रियः २४ सर्वयज्ञफलंप्राप्यासयातिहरिसारूप्यंस

र्वभोगसमन्वितंत्रयोदशपराकश्चयः कुर्यात्प्रयतोनरः २५ सयातिपरमानंदंयत्रगत्वानशोचति। मासोपनिरतागंगास्नानदानपरायणाः॥२६॥धर्ममार्गप्रवक्तारोयुक्ताश्चवनसंश्रयाः॥यतीनांब्रह्मचा रिणामविरणोचसत्तमाः॥२७॥मासोपवासःकर्त्तव्योवनस्थानांविशेषतः॥नारीवापुरुषोवापि व्रतमेतच्चदुर्लभं २८ कृत्वामोक्षमवाप्नोतियोगिनामपिदुर्लभं॥गृहस्थोवनस्थोवायतिर्वाभिक्षु कोपिवा॥२९॥अहेतुज्ञानशून्योपिमोक्षमाप्नोतिमानवः॥यइदंव्रतमाहात्म्यंनारायणपरायणः ३० शृणुयाद्वाचयेद्वापिसर्वपापैःप्रमुच्यते॥ ॥ ॥ ॥ इतिश्रीबृहन्नारदीयपुराणेमासोपवासक थनंनामविंशोध्याय २०॥ ॥ ॥ ॥ सूतउवाच॥इदमन्यत्प्रवक्ष्यामिव्रतंत्रैलोक्यदुर्लभं। विश्रुतं सर्वपापप्रशमनंसर्वकामफलप्रदं १ ब्राह्मणक्षत्रियविशांशूद्राणांचैवयोषितां॥मोक्ष दंकुर्वतांभक्त्याविष्णोःप्रियकरंद्विजाः २ एकादशीव्रतंनाम सर्वकामफलप्रदं॥कर्त्तव्यं सर्वथा विप्रा विष्णुप्रीतनहेतवे ३ एकादश्यांनभुंजीतपक्षयोरुभयोरपि॥यदिभुंक्तेसपापीहपरत्रन रकंव्रजेत् ४ उपवासफलंविप्रकुलिप्सुर्नलभेत्क्वचित्॥सर्वपापदिनरात्रौअहोरात्रंतु प्रथमं ५ एकादश्यांदिनेयस्तुभोक्तुमिच्छतिसत्तमाः॥सभोक्तुंसर्वपापानिस्पृहयेन्नात्रसंशयः ६॥

भवेद्दशम्यामेकादश्यां मुनिसत्तमाः एकादश्यां निराहारो यदि मुक्तिमभीप्सति ॥७॥ या
निकानिचपापानि ब्रह्महत्यासमानिच अभक्ष्यं श्रियतिष्ठंति संप्राप्तेहरिवासरे ॥८॥ ब्रह्म
हत्यादिपापानां कथंचिन्निष्कृतिर्भवेत् एकादश्यांतु पापानां निष्कृतिर्नास्ति कुत्रचित् ॥९॥
युक्तोवा प्रलापान्तकृयुक्तोवा सर्वपातकैः एकादश्यां निराहारो सयातिपरमंपदं ॥१०॥ एकादशीमहापु
ण्यां विष्णोः प्रियतरांतिथिं संसेव्यासर्वथाविप्रैः संसारच्छेदलिप्सुभिः ॥११॥ दशम्यांप्रा
तरुत्थाय धृतधावनपूर्वकं स्नात्वाचविधिवद्विप्रा मर्चयेत्प्रयतेंद्रियः ॥१२॥ एकादशीभवेत्त
स्मिंदिनेनिगृहीतेंद्रियः विष्णोः समीपेशयीचनारायणपरायणः ॥१३॥ एकादश्यांतथा
स्नात्वा संपूज्यजनार्दनं गंधपुष्याक्षतैः सम्यक्तत्रैवमुदयेत्पुनः ॥१४॥ एकादश्यांनिरा
हारः स्थित्वाहरिपरेसहे मोक्षाभिपुंडरीकाक्ष शरणंमेभवाच्युत ॥१५॥ इमंमंत्रंसमुच्चार्यवि
द्वद्वेवस्यचक्रिणः भक्तिभावेननुष्ठाय उपवासंसमर्पयेत् ॥१६॥ देवदेवस्यपुरतः कुर्याद्वि
जागरं नियतव्रती गीतवाद्यैश्चनृत्यैश्च पुराणश्रवणादिभिः ॥१७॥ ततः प्रातःसमुत्थायद्वा ॥८३॥
दश्यांनियतव्रती स्नात्वाचविधिवद्विप्रा मर्चयेत्प्रयतेंद्रियः ॥१८॥ पंचामृतेनसंस्ना

॥नारद॥

प्यएकादश्यांजनार्दनं द्वादश्यांपयसाप्यहरिसारूप्यमश्नुते ॥१९॥ अज्ञानतिमिरांधस्यव्र
तेनानेनकेशवप्रसीदसुमुखोनाथ ज्ञानदृष्टिप्रदोभव ॥२०॥ एवंविज्ञाप्यविप्रेंद्रान्देवदेव
स्यचक्रिणः भोजयेच्छ्रद्धयादद्याद्दक्षिणांतथा ॥२१॥ ततःस्वबंधुभिःसार्धं नारा
यणपरायणाश्चत्वारपंचत्रयोवा महाभागाः स्वयंभुंजीतवाग्यतः ॥२२॥ एवंयः प्रयतःकुर्यात्सुप्र
भैकादशीव्रतं सयातिविष्णुभवनंपुनरावृत्तिदुर्लभं ॥२३॥ उपवासव्रतपरोधर्महानीचस
त्तमाः चांडालपतितांश्चापिवाह्यात्रेणापिनार्चयेत् ॥२४॥ नास्तिकानिंदकंचैव मर्यादालोपकं
क्रियाशून्यंतथाउपवासव्रतपरोनार्चयेत्सर्वथाबुधः ॥२५॥ वृषलीमात्मनोष्टांवृषली
पतिमेवच अभक्ष्यभक्षयाजकंचैवनार्चयेत्सर्वथाव्रती ॥२६॥ कुंडाशिनंगोलकंचतथा
देवलकाशिनंभिषजंकाव्यकर्त्तारंदेवद्विजविरोधिनं ॥२७॥ परान्नलोलुपंचैवपरस्त्री
लोलुपंतथाव्रतोपवासनिरतोवाह्यात्रेणापिनार्चयेत् ॥२८॥ इत्येवमादिभिःशुद्धोवर्षास
र्वाहनेरतः उपवासपरोभूत्वापरंसिद्धिंगमिष्यति ॥२९॥ नास्तिगंगासमंतीर्थं नास्तिमा
तृसमोगुरुः नास्तिविष्णुसमोदेवः नापोनानशनात्परं ॥३०॥ क्षत्रियस्यासमोधर्मोनास्ति

नास्ति वेदसमं शास्त्रं नास्ति शांतिसमं सुखं॥नास्ति सत्यपरं ज्योतिस्तपो नास्ति नशा नास्
तिऽशानास्ति क्षमासमो धर्मो नास्ति कीर्तिसमं धनं॥नास्ति ज्ञानसमो लाभः स्तपो नानशनास्
तथाऽत्रैवोदाहरंतीमं इतिहासंपुरातनं॥संवादं भद्रशीलस्य तासतुर्गव्यवसायच॥३॥पुरा
हिगालवो नामसत्यधर्मपरायणः॥उवास नर्मदातीरे शांतोदांतस्तपोनिधिः॥२॥बदुवृक्षसमा
कीर्णे मृगयूथनिषेविते॥सिद्धचारणगंधर्वयक्षविद्याधरान्विते॥३॥कंदमूलफलैः पूर्णे मुनि
वृंदनिषेविते॥गालवो नाम विप्रेंद्रो निवासमकरोच्चिरं॥४॥तस्याभवद्भद्रशीलइति ख्यातः
सुतोवशी॥नातिसमोमहाभागोमहानारायणपरायणः॥५॥बलक्रीडनकालेपिभद्रशीलोम
हामतिः॥तत्तन्नबोधितश्चापि सिद्धैरपिमुनीश्वरैः॥६॥हरिंमृदेवनिर्माय सर्वेज्ञापरमन्न॥
नमस्कुर्वन्भद्रमिति विष्णवेसर्वजिष्णवे॥७॥सर्वेषांजगतांस्वस्ति रयादितिहिचाब्रवीत्॥
क्रीडाकालंमुहूर्त्तंवामुहूर्तंधर्मचारिवा॥८॥एकादशीतिसंकल्प्य विष्णवेप्रणमत्यसौ॥सतु॥
एवंसुचरितंदृष्ट्वा तनयेगालवोमुनिः॥९॥अएतद्दिवसमयाविष्णुः समाराध्यतपोनिधिः॥
गालवउवाच॥भद्रशीलमहाभागभद्रशीलोसिपुत्रक॥१०॥चरितंमंगयुक्तं योगिनांमपि

दुर्लभोहरिरत्यापरानित्यंसर्वभूतहितेरतः॥११॥एकादशीव्रतपरोलोकानुग्रहतत्परः॥भिक्षु
द्यानिर्ममोशांतोहरिध्यानपरायणः॥१२॥जातियेपरमाबुद्धिः कथंवकुरुमेहार्हसि॥सूतउवाच
भद्रशीलःपितुर्वाक्यंश्रुत्वाप्रहसितानन॥१३॥स्वानुभूतंयथावृत्तं सर्वंपित्रेन्यवेदयत्॥भ
द्रशीलउवाच श्रुणुतातमहाभागअनुभूतंमयापुरा॥जातिस्मरत्वाज्ञानाग्नियोमनप
रिभाषितं॥१४॥सूतउवाच एतच्छ्रुत्वामुनिश्रेष्ठो गालवोविस्मयान्वितः॥उवाचप्रीतिमापन्नोभद्र
शीलंमहामतिं॥१५॥गालवउवाच यस्मत्पूर्वंमहाभागकिमुत्तंचयमेनते॥कस्यवाकेनहेतो
रत्रतस्सर्वंवक्तुमर्हसि॥१६॥भद्रशीलउवाच॥अहमासंपुरातातराजासोमकुलोद्भवः॥धर्म
कीर्तिरितिख्यातो दत्तात्रेयेनशासितः॥१७॥नववर्षसहस्राणिमहीं कृत्स्नामपालयन्॥धर्मा
त्स्थाअधर्माच्चप्रयात्यबहवः कृताः॥१८॥ततःश्रियाप्रमत्तोहमधर्मेकृतवान्हं॥पापेऽज्ञा
नसंसर्गात्पाखंडचरितोद्भवं॥१९॥पुण्यार्जनानिपुण्यानिमयापिसुबहून्यपि॥बोधाःपाखंडि
नःप्रोक्ताःयतोवेदानिंदकाः॥२०॥अथतस्माद्द्विजस्तानेक्षेन यदिवेदेषुभक्तिमान्॥पाखंडा॥
पमात्रेण प्रनष्टेनिपोयन॥२१॥पाखंडेबोधितोहंतु वेदमार्गेसमस्तजन॥सखाश्चसर्व
एवध्वस्ताः कूटंचकृविदामया॥२२॥अधर्मनिरतेमोनुदृष्यामद्देशकाप्रजाः॥सदेवदु

॥नारद॥
॥८४॥

षूनेच कुःषष्ठांशंतत्रमेभजन्॥५५ एवंपापसमाचारोव्यसनासक्तस्तथामृगयाभि
रतोभूत्वाएकदाप्रविश्यवनं॥५६॥ससैन्योहंवनेतत्रहत्वाबहुविधान्मृगान्क्षुत्तृड्भिरर्दितो
श्रांतोरंभातीरमुपागमं॥५७ प्रवृद्धतापविक्रांतोरवार्णाह्नानमाचरन्॥अदृष्टसैन्यएकाकीपा
ड्यमानोबुभुक्षया॥५८ समेतास्तत्रवैकेचिन्नानातीरवासिनःएकादशीव्रतपराःप्रयाद्
ष्टानिशामुखे॥५९॥निराहारश्चतत्राहंएकाकीतज्जनैःसहजागरंकृतवांस्तानिद्रयान्विते
निशि॥६०॥अथश्रमपरिक्रांतःक्षुत्पिपासाप्रपीडितश्चतदैवजागरेणोहंनावलंचवत्तमाम
तः॥६१॥ततोममभटैर्वीरोमहादंष्ट्राभयंकरैःअनेकक्लेशसंपन्नोमार्गात्प्राप्तोममांति
कंतदंष्ट्राकरालवदनंमपश्यत्समवर्तिनं॥अथकालःचित्रगुप्तमदूरेदमभाषत॥६३॥
चिरंविचार्यमासपुनश्चेदमुवाचहाचित्रगुप्तवाच॥असौपापहतःसत्यंवथाविशृ
णुधर्मराजद्वादश्यांएकादश्यांनिराहारासर्वपापविमोचितः॥[illegible]
बहून्यपिपापकादशीदिनेशेषेतीरमनोरमे॥६५॥जागरंचोपवासंचकृत्वापापैर्विमोचितः
यानिकानिचपापानिकृतानिसुबहून्यपि॥६६॥तानिसर्वाणिसर्वाणिनष्टानिउपवासप्र
भावतः॥६७॥भटऊचुःवाच॥एवमुक्तोधर्मराजश्चित्रगुप्तेनधीमता॥तमाहदंडवद्भूमौ

॥८५॥

ममतानाम्निकंपिनम्॥६९॥सूजयामासमांतत्रभक्तिभावेनधर्मराट्॥ततश्चस्वभटान्सर्वान्
अदूरेदमुवाचह॥६९॥यमउवाच॥शृणुध्वंमद्वचोदूताहितंवक्ष्यामियत्नुतम्॥धर्मेषुनिरतंसर्वं
मनसाभायध्वंममांतिके॥७०॥येविष्णुभक्तिनिरताःप्रयताःकृतज्ञाःएकादशीव्रतपरा
विजितेंद्रियाश्चनारायणाच्युतहरेशरणंभवेतिशांतावदंतिसततंतरसाःस्मरध्वं॥७१॥ना
रायणाच्युतजनार्दनकृष्णविष्णोपद्मेशपद्मदयितासिवशंकरेतिनित्यंवदंत्यखिललोकहि
ताःप्रशांताशूराभटास्तजतितत्रनमोस्तिसिद्धा॥७२॥नारायणार्पितधियोहरिभक्तिभ
क्तास्वाचारमार्गनिरतानुरुसेवकांश्चसत्सङ्गदानिरतान्हरिकीर्तिसक्तान्दूरात्यजध्व
मनिशंहरिनामसक्तान्॥७३॥पाखंडसंगरहितान्निजभक्तिनिष्ठसंसंगलोलुपतरंश्चत
थातिशेयान्॥७४॥शंभोहरेसकलबुधिसमांस्तथैवदूरात्यजध्वमुपकारपरायणांश्च॥७५॥
येवीक्षिताहरिकथामृतसेवकेश्चनारायणास्मृतिपरायणमानसेश्च॥विप्रेंद्रपादजलसेच
नसंप्रहृष्टास्तान्यायिनोपिचभटाःसततंस्मजध्वं॥७७॥येनामसंतपरिहर्षनशीलिनश्च
लोकाद्वेषाद्धिजजनाहितकर्मिणश्च॥तानेवलोभनिरतान्जननाशहेतूंस्तानानयध्वम

परापकृतांश्चदूता॥॥२॥एकादशीव्रतपरान्सुखमुग्रशीलंलोकापवादनिरतंपरदोषभेद
कंचग्रामस्यनाशकरमुत्तमनिंदकंचदूनाःसमानयतांक्षिप्रंधनेषुलुब्धं॥३॥येविष्णुभ ॥नारद॥
क्तिविमुखाननमैक्षियेचनारायणायशरणागतपालनाय॥विहायलयंचनहियातिनरेति
मूर्खीस्तानानयध्वमतिपापरतान्त्रशास्यात्॥४॥भद्रशीलउवाच॥एवंसंश्रुत्वान्यूर्यमे
नपरिभाषितंदक्षेनमहतोपनश्रुत्वातत्कर्मतत्रवै॥७॥पितुर्ममानुतापेनतथर्मश्रवणेन
चतदैवसर्वपापानिनिःशेषंविगतानिभो॥८॥पापशेषविनिर्मुक्तेहरिसारूप्यमागतौस
हस्तस्यसंकाशमाननायथमस्तदा॥९॥एवंदृष्ट्वाविस्मितास्तेयमदूताश्चयोत्कयाश्विश्वा
सेपरमंवक्तुर्यमोक्तेसर्वएवते॥१०॥ततःसंपूज्यमांकोविमानशतसंकुलं॥सद्यःसंप्रेष
यामासतद्दिव्यंपरमंपदं॥११॥विमानकोटिभिःसार्धंसर्वभोगसमन्वितैः॥कर्मणातेन
जनकविष्णोर्लोकंमयेषितं॥१२॥कन्यकोटिसहस्राणिकन्यकोटिशतानिच॥स्थित्वाविष्णु
पदेरम्येमहाहेडलोकंसमागतः॥१३॥तत्रापिसर्वभोग्याःसर्वदेवनमस्कृतःभाव
कादित्यत्वातत्तोमत्तिमुपागतः॥१४॥तत्रापिविप्रप्रवरकुलेमहतिसंभवे॥जातिस्मरत्व ॥८९॥

ज्ञानंतिसर्वमेतन्मुनीश्वर॥७॥तस्माद्विष्णुर्चनंनित्योनातःहंप्रकरोमिवैएकादशीव्रत
मिदमितिनज्ञातवान्पुरा॥१५॥जातिस्मृतिप्रभवेनतन्नतंसांप्रतंमया॥अवसेनापियत्कर्मकृ
तंतस्यफलप्रदं॥१६॥एकादशीव्रतंभक्त्यातुर्वनांकिमुतप्रभो॥तस्मात्क्षिप्रंजनकशुभ
मेकादशीव्रतं॥१७॥विष्णुरुवाचहरहःपरमस्थानंक्षयाएकादश्यांव्रतंयेतुकुर्वंतिश्र
द्धयानराः॥१८॥तेषांनविघ्नभवेसर्वेपरमोदयायवै॥यत्नेनशृणुपाणिस्थंपठेद्वाभक्तिसंयुत
॥१९॥सर्वपापविनिर्मुक्तोविष्णुलोमहीयते॥सूतउवाचएवंपुत्रवचःश्रुत्वासंतुष्टोगालवोमुनि
॥२०॥अवापपरमांतुष्टिंमनसांचातिहर्षितः॥धन्यजन्मसफलंजातंमेहरिपावनीकृतः
॥२१॥यतोसोमकुलेजातोविष्णुभक्तिपरायणः॥इतिसंतुष्टचेतास्तुस्वपुत्रस्यधीमतः॥२२॥
हरिपूजाविधानंतुयथावत्समबोधयत्॥इत्येतद्गालमुनिश्रेष्ठयथावत्कथितंमया॥२३॥
संकोचविस्तरेणांचकिमन्यत्कथयाम्यतः॥॥२४॥इतिश्रीबृहन्नारदीयेपुराणेद्वितीयो ॥८९॥
ध्यायः॥१॥ऋषयऊचुःकथितंभवतासर्वंश्रुतंज्ञातंतथैवोक्तंविदुभागीरथ्याश्चमहिमाधर्मार्थ
र्मोश्चसत्तम॥१॥हरिपूजाविधानंचव्रतानिचसविस्तरं॥एकादश्याश्चमहिमाश्रुतोस्मा

वर्णाश्रिनस्मात्ख्याता एतेषांब्राह्मणोधिक॥७॥ब्राह्मणाःक्षत्रियोवैश्यादिजात्रोक्तास्त्रयस्तथा॥

क्तोविशेषत॥२॥इदानींश्रोतुमिच्छामोवर्णाचारविधिमुने॥तथैवाश्रमाचारंप्रायश्चित्तवि
धिंतथा॥३॥एतत्सर्वंमहाभागस्तत्सर्वार्थकोविद॥कृपयापरयाविष्टोयथावद्वक्तुमर्हसि॥४॥
सूतउवाच॥शृणुध्वमृषयःसर्वंयदुक्तोब्रह्मसूनुना॥सनत्कुमारमुनयेवर्णाचारविनिर्णयः॥५॥
वर्णाश्रमाचारयुतैःपूज्यतेहरिरीश्वरः॥तस्माद्वदाम्यविप्रेंद्राःप्रश्नाद्योविदितश्रयः॥६॥
ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चत्वारएवहि॥मातृतश्चोपनयनाद्द्विजयजन्मवैक्रमात्त॥७॥
एतैर्वर्णैःसर्वधर्माःकार्यावर्णानुरूपत॥स्वकर्मधर्मसंयोगान्पाखंडःप्रोच्यतेबुधै॥८॥स्वगृ
ह्योदितंकर्मद्विजःकुर्वन्कृतीभवेत्॥अन्यथापतितोविंद्यात्सर्वकर्मबहिष्कृतं॥९॥युगध
र्माःपरित्याज्याःवर्णैरिमर्यथोचितं॥ग्रामाचारास्तथात्याज्याःस्मृतिमार्गविरोधिनः॥१०॥कर्म
णामनसावाचायत्नाद्धर्मान्समाचरेत्॥अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नतु॥११॥समुद्रया
त्वास्वीकारःकमंडलुविधारणं॥द्विजानांसवर्णासुकन्यासूपयमस्तथा॥१२॥देवरेणसुतोत्प
त्तिर्मधुपर्कपशोर्वधः॥मांसदानंतथाश्राद्धे वानप्रस्थाश्रमस्तथा॥१३॥दत्तक्षतायाःकन्या
यांःपुनर्दानंपरस्यच॥दीर्घकालंब्रह्मचर्यंनरमेधाश्वमेधकौ॥१४॥महाप्रस्थानगमनंगोमेध

॥नार०॥ ॥८७॥



श्चतथाऽन्यस्य॥इमान्धर्मान्कलेर्युगेवर्जनादुर्मनीषिणः॥१५॥देशाचाराःपरिग्राह्यास्तत्तद्देशाय जैर्न
नेः॥अन्यथापतिताह्येयाःसर्वधर्मबहिष्कृताः॥१६॥ब्राह्मणक्षत्रियविशांशूद्राणांचैवसत्तमाः॥क्रिया
समासतोवक्ष्येशृणुध्वंसुसमाहिताः॥१७॥दानंदद्याद्द्विजेंद्राणांयज्ञैर्देवान्यजेत्तथा॥वृत्यर्थंयाय
जंयैश्चैवमन्यानध्यापयेत्तथा॥१८॥याजंयेद्दुर्मनान्योनान्योगानविप्रेत्यादकीभवेत्॥कुर्याच्चैवप्र
हणंतथाऽन्नस्यपरिग्रहं॥१९॥प्रसह्योच्चपरेभ्यस्समबुद्धिर्वर्तेत्तथा॥सर्वलोकहितंकुर्यान्मृदुवा
क्यमुदीरयेत्॥२०॥ऋतावभिगमःपत्न्यांशास्त्रेब्रह्मणस्यवै॥नकस्याप्यहितंश्रद्धाद्विद्वत्पूजा
परोभवेत्॥२१॥दानानिदद्याद्विप्रेभ्योक्षत्रियोपिद्विजोत्तमाः॥कुर्याच्चैवदयाग्रहणंयज्ञैर्देवान्यजे
त्तथा॥२२॥शास्त्रजीवोभवेच्चैवपालयेद्धर्मतोमहीं॥दुष्टानांशासनेकुर्याच्छिष्टानांपरिपालनं॥२३॥
पशूपाल्यंचवाणिज्यंकृषिश्चमुनिसत्तमाः॥वेदस्याध्यायनंचैववैश्यस्याऽपिप्रकीर्तितं॥२४॥
दद्यादानंचविप्रेभ्योयज्ञैर्देवान्यजेत्तथा॥कुर्याच्चदयाग्रहणंधर्मंशूद्रवत्समाचरेत्॥२५॥कृषि
कृषजीविधनैःकारुधनेनवादयादानोपिशूद्रोपिपाकयज्ञैर्यजेन्नतु॥२६॥ब्राह्मणक्षत्रियवि
शांशुश्रूषाविहितोभवेत्स्वतुकालाभिगमनंस्वदारेषुप्रशस्यते॥२७॥सर्वलोकहितेष्वंगा

गलं प्रियवादिता । अनायासमहासाहसक्षितिक्षानाक्षिमानित्व ॥ २९ ॥ समानोसर्ववर्णानांमुक्ति
भिपरिकीर्तितं । सर्वेचमुक्तिमायांतिस्वाश्रमोचितकर्मणा ॥ ३० ॥ ब्राह्मणक्षत्रियाचारमाश्रयेदापदि
द्विजः ॥ क्षत्रियोपिचविद्वत्तिमस्यापदिसमाश्रयेत् ॥ ३१ ॥ नाश्रयेच्छूद्रवृत्तिंतुअत्यापत्स्वपि वैद्विजः
यथाश्रयेद्विजोन्मादः सचांत्यजतितंस्मृतः ॥ ३२ ॥ ब्राह्मणाक्षत्रियाचस्त्रीद्विजातिहिविश्रुताः ॥ चत्वा
रस्त्वाश्रमास्तेषांपंचमोनोपपद्यते ॥ ३३ ॥ ब्रह्मचारीगृहीवानप्रस्थोभिक्षुश्चसत्तमाः ॥ चत्वारस्त्वाश्रमा
श्रमस्तेषांपंचमोनोपपद्यते ॥ ३४ ॥ चतुर्भिराश्रमैरेभिसाध्यतेधर्मसत्तमाः ॥ विद्युत्तुष्यंतिविप्रेंद्राः
कर्मयोगरतास्सदा ॥ ३५ ॥ निस्पृहाःशांतमनसःस्वकर्मपरिनिष्ठिताः ॥ त्रियांतिपरमंस्थानं नावर्त्तंतेपुनः
पुनः ॥ ३६ ॥ ॥ इतिबृहन्नारदीयेपुराणेद्वितीयेविंशोध्यायः ॥ २१ ॥ ॥ सूतउवाच ॥ वर्णाश्रमाचार
विधिं प्रवक्ष्यामिसमासतः ॥ शृणुध्वमृषयःसर्वेसुसमाहितचेतसः ॥ १ ॥ यःस्वकर्मपरित्यज्यपरकर्म
र्मनिषेवते ॥ सखंडःसहिविज्ञेयःसर्वधर्मबहिष्कृतः ॥ २ ॥ गर्भाधानादिसंस्कारः कार्योश्रात्रवि
धानतः ॥ स्त्रीणाममंत्रतः कार्यायथाकालंयथाविधिं ॥ ३ ॥ सीमंतप्रथमेगर्भे चतुर्थेमासिशस्यते ॥ ष
ष्ठेवाष्टमेवापिअष्टमेवापिकारयेत् ॥ ४ ॥ जातेपित्रेपितास्नात्वा सचैलंजातुकर्मतु कुर्यान्नांदीमुखं ॥ ८८ ॥

संश्राद्धंस्वस्तिवाचनपूर्वकं । हिरण्यंचाग्न्यधानेवानांदीश्राद्धंप्रकल्पयेत् ॥ अथोनकारयेद्यस्तु
सचांडालउच्यते । च । कृत्वाभ्युदयिकंश्राद्धं पितासुत्रस्यवाग्यतः । कुर्वतिनाम्निनिर्देशेसजकांतेय
थाविधिः ॥ ७ ॥ अस्पष्टमर्थहीनंचअतिगुर्वक्षरान्वितं । मदयात्मावित्रेंद्रस्तथाचविषमाक्षरं ॥ ८
सृतीयेवस्थेचूडंपंचमेसप्तमेपिवा ॥ षष्ठेचैवाष्टमेवापिकुर्याद्वृद्धोक्तमार्गतः ॥ ९ ॥ दैवतोगादति
क्रांतेगर्भाधानादिकर्मणि । कर्त्तव्यःपादकृच्छ्रोवैचौडवर्षः प्रकल्पयेत् ॥ १० ॥ गर्भाष्टमेष्टमेवापित्रो
र्मरणंयापनायनं । आषोडशाब्दपर्यंतंकालमाहुर्मनीषिणः ॥ ११ ॥ गर्भैकादशमेतत्तुराजन्यस्यो
पनायनं । चतुर्विंशाब्दपर्यंतं कालमाहुर्मनीषिणः ॥ १२ ॥ एतत्कालविधिस्तस्यद्विजस्यानिक्र
मेभवेत् । सावित्रीपतितंविद्यान्नलिप्तंकदाचन ॥ १३ ॥ द्विजोपनयनेविप्रमुख्यकाल्यतित्र
यं । द्वादशाब्दंचरेत्कृच्छ्रंप्राजापत्यंद्वायणंतथा ॥ १४ ॥ सतोपनद्यंचैवकृत्वाकर्मसमाचरेत् ॥ अन्य
थापतितंविद्यात्कर्त्ताचब्रह्महाभवेत् ॥ १५ ॥ मौंजीद्विप्रस्यविज्ञेयाधर्ज्यक्षत्रियस्यवै । आज्ये
वैश्यस्यविज्ञेयंदंडावक्ष्यंयथाक्रमं ॥ १६ ॥ पालाशोब्राह्मणस्योक्तो नृपस्योदुंबरस्तथा ॥ वैल्वो
वैश्यस्यविज्ञेयः प्रमाणंश्रृणुतद्विजाः ॥ १७ ॥ विप्रस्यकेशमानंस्यादललाटंनृपस्यतु ॥ नास

ग्रसमित्तंदंडंवैल्वस्याकुर्विपश्चितः॥१९॥तथावासांसिवक्ष्यामिविप्रादीनांयथाक्रमं॥काषायंचैव
माजिष्ठंहारिद्रंचप्रकीर्तितं॥२०॥उपवीतीद्विजोविप्रापरिचार्यापरोगुरोः॥वेदग्रहणपर्यंतंनिव
सद्गुरोर्गृहे॥२१॥प्रातस्नायीभवेद्वेणासमित्कुशफलादिकान्॥गुर्वर्थमाहरन्नित्यंकल्पंकल्पंसु
नीश्वरः॥२२॥यज्ञोपवीतमजिनंदंडंचद्विजसत्तमाः॥नक्षत्रेनवमेत्र्यूनेभ्रष्टेजन्मनिसंपत॥२३॥
कीर्तनोवर्त्तनंप्राज्ञभिक्षांनैवकदाचन॥भिक्षांचश्रोत्रियागारेदाहरेत्प्रयतेंद्रियः॥२४॥भवत्पू
र्वंब्रह्मणास्यभवन्मध्यनृपस्यच॥भवदंत्यविशःप्रोक्तं॥भिक्षामाहरणेवचः॥२५॥सायंप्रात
रग्निकार्यंयथाकालंजितेंद्रियः॥कुर्यात्तिदिनंचर्णाब्रह्मयज्ञमतंद्रितः॥२६॥अग्निकार्यंपरि
त्यक्तःपतितःप्रोच्यतेबुधैः॥ब्रह्मयज्ञविहीनश्चब्रह्महापरिकीर्तितः॥२७॥देवतार्चनंकुर्याद्ध
श्रूषानुपदंगुरोः॥॥भिक्षांनैवभोजयेन्नित्यंनैकान्नादिंकदाचन॥२८॥आनीयैनंनिवेद्यप्राणांश्च
हाभिक्षांजितेंद्रियः॥निवेद्यमुनयेश्नीयाद्गुरुयत्तदनुज्ञया॥२९॥मद्यस्त्रीमांसचर्णंतांबूलंदंतधा
वनं॥उच्छिष्टभोजनंचैवदिवास्वापंचवर्जयेत्॥३०॥छत्रपादुकगंधाभ्यंतधामाल्यानुलेपनान्
जलकेलिंगीतवाद्यंद्यूतंपरिवर्जयेत्॥३१॥परवादंचोपतापंविप्रलापंतथाजनेपाषंडजनसं

सर्गंश्रूद्रसंगंचवर्जयेत्॥३२॥अभिवादनशीलस्यादृद्धेषुचयथाक्रमं॥ज्ञानवृद्धास्तपोवृद्धाः
वयोवृद्धाइतित्रयः॥३३॥अधार्मिकानिदुःखनिनिवारयेद्गुरुर्ग्वेदशास्त्रोपदेशेनतंपूर्वमभि
वादयेत्॥३४॥असावहमितिब्रूयाद्विजोवैस्वाभिवादनं॥नाभिवाद्याश्चविप्रेणक्षत्रियावाद्याः
कदाचन॥३५॥नास्तिवंशेममर्यादंकृतघ्नंग्रामयाजकं॥स्तेयंचकितवंचैवकदाचिन्ना
भिवादयेत्॥३६॥पाषंडपतितंमूर्खंवैतपानक्षत्रपाठकं॥तथापानकिनंचैवकदाचिन्नाभिवादये
त्॥३७॥कृतघ्नंपुंश्चलीजारंस्तेनंकोगर्भघातिनं॥दुश्चीलांचतथाचेर्ज्यांकदाचिन्नाभिवादयेत्॥३८॥
उन्मत्तंचशठंपूर्तंधावंतमशुचिंतथा॥अभ्यक्तसिरसंचैवजपंतंनाभिवादयेत्॥३९॥दीनयाच
नंप्रकुर्वंतंसंप्रियुष्यकुरुंस्तथा॥उदपात्रधरंचैवक्षुंजंतंनाभिवादयेत्॥४०॥विवादशीलि
नंचंक्रमंतंजलमध्यगं॥भिक्षाभयारिणंचैवशयानंनाभिवादयेत्॥४१॥श्राद्धंव्रतंतथादानं
देवताभ्यर्चनंतथायश्चंचतर्पणंचैवकुर्वंतंनाभिवादयेत्॥४२॥सभायांयज्ञशालायांदेवतायत
नेषूपि प्रस्थेकेतुनमस्कारोलंतिपुण्यंपुरार्जितं॥४३॥कृतेभिवादनेयस्तुनकरोत्यभिवादनं
नाभिवाद्यःसविद्वद्भिर्यथाशूद्रस्तथैवसः॥४४॥प्रक्षाल्यपादावाचम्यगुरोरभिमुखःस

सदा ॥ तस्यपादोदकंगृह्य अधीयीत विचक्षणः ॥ ४४ ॥ अष्टकासुचतुर्दश्यां प्रतिपत्सर्वपोषधा
महाभरण्यां विप्रेंद्राः श्रवणद्वादशीदिने ॥ ४५ ॥ भाद्रपदापरपक्षेद्वितीयायांतथैवच ॥ नार० ॥
यनो थानद्वादश्यां श्रोत्रीयमरणंगते ॥ ४६ ॥ बंधितब्रह्मणोचैव प्रवृद्धकमलेनथा उल्कांड
शनिप्रपतनेतथाविप्रावमानिन ॥ ४७ ॥ आषाढीकार्तिकीचैफाल्गुनीचद्विजोत्तमाः ॥ द्वितिं
याशुक्लपक्षस्यग्रामदाहेतथैवच ॥ ४८ ॥ माघस्यसप्तमी शुक्लानवम्यांश्वयुजेतथा ॥ परि
वेषादिकेसूर्येश्रोत्रीयगृहमागते ॥ ४९ ॥ मन्वादिषुविप्रेंद्रायुगादिषुचतसृषु ॥ नाधीयीतद्वि
जःकश्चित्सर्वकर्मफलेप्सुकः ॥ ५० ॥ शुक्लात्तृतीयावैशाखे प्रेतपक्षत्रयोदशी ॥ कार्तिकेन
वमी शुक्ला माघमासेचपौर्णिमा ॥ ५१ ॥ एतायुगादयश्चोक्तादत्तस्याक्षय्यकारिकाः मन्वा
दीश्चप्रवक्ष्यामि शृणुध्वंसुसमाहिताः ॥ ५२ ॥ आश्वयुक्शुक्लनवमी कार्तिकेद्वादशीसिता
तृतीयाचैत्रमासस्यतथाभाद्रपदस्यच ॥ ५३ ॥ आषढशुक्लदशमी सितामाघस्यसप्तमी ॥
श्रावणीबाष्टमीकृष्णाछातथाषाढीचपौर्णमी ॥ ५४ ॥ फाल्गुनीपौर्णमासीतथामावास्यापौषस्यैकाद ॥ १०० ॥
शीतथाकार्तिकीफाल्गुनीचैत्री ज्येष्ठीपंचदशीसिता ॥ ५५ ॥ मन्वादयः समाख्याताद्दत्तस्य

क्षयकारिकाः द्विजैश्राद्धंतुकर्तव्यं मन्वादिषुयुगादिषु ॥ ५७ ॥ श्राद्धेनिमंत्रितेचैवतथाश्रूकंपने
पिचाएवमादिषुसर्वेषुअनाध्यायःप्रशस्यते ॥ ५८ ॥ अनाध्यायेषुधीतानां प्रज्ञामायुर्यशश्रियं ॥
अजस्रंबलमारोग्यंनिष्कंतनियमस्यच ॥ ५९ ॥ अनाध्यायेषुधीतेतुविद्याद्वंद्यंघ ॥
तकं ॥ नतंसंभाषयेविप्रानतेनसहसंवसेत् ॥ ६० ॥ कुंजगोलकयोःकेचि ज्जडादीनांचसत्तमाः ॥
वेदंतिवोपनयंनसुत्रादिनकेचन ॥ ६१ ॥ अनधीत्यतुयोवेदोछात्राणिपठतेनरः शूद्रतुल्यः
सविज्ञेयोद्विजत्वंनोपपद्यते ॥ ६२ ॥ अनधीतद्विजोयस्तु आचरेषुप्रपद्यते नाचारफलमाप्नोति
यथाशूद्रस्तथैवसः ॥ ६३ ॥ नित्यंनैमित्तिकंकाम्यंयच्चान्यत्कर्मवैदिकं ॥ अनधीतस्यविप्रस्यस
र्वंभवतिनिष्फलं ॥ ६४ ॥ सर्वधर्ममयोविष्णुः देवःसाक्षाद्धरिस्मृतः ॥ वेदाध्यायीततोविप्राः स
र्वान्कामानवाप्नुयात् ॥ ६५ ॥ ॥ ७ ॥ इतिश्रीबृहन्नारदीयपुराणेपूर्वखंडेशौ ध्यायः ॥ ३ ॥ ७ ॥ त्रयो
॥ सूतउवाच ॥ वेदग्रहणपर्यंतं शुश्रूषाणिरतोगुरुं ॥ अनुज्ञातस्ततस्तेन कुर्यादग्निपरिग्र
हं ॥ १ ॥ वेदांगानिचवेदौ च धर्मशास्त्राणिचद्विजाः ॥ अधीत्यागुरवेदत्वादक्षिणांसंभवेद्ध
नं ॥ २ ॥ रूपलक्षणसंपन्नंसगुणं सत्कुलोद्भवं ॥ द्विजः समुद्वहेत्कन्यामन्यथागुरुतल्पगः ॥ ३ ॥

॥बृहं॥ रोगिणीं चैववृत्तघ्नीं सरोगकुलसंभवां॥अतिकेशामकेशांच वाचालांनोद्वहेद्विजः॥४॥कपि
॥९१॥ शांवामनांचैवदीर्घदेहांविरूपिणीं॥न्यूनाधिकांगीमुन्मत्तांपिशुनांनोद्वयेद्बुधः॥५॥स्थूलभगुल्फां ॥नार०॥
दीर्घजंघांनतथैवपुरुषाकृतिं॥समश्रुयंजनसंयुक्तां कन्यांनैवोद्वहेद्बुधः॥६॥वृथाहोयमुरवीं
चैवसदान्यगृहवासिनीं॥विवाशीलांचबृहतीं निष्ठुरांनोद्वहेद्बुधः॥७॥बद्धाक्षिनीं स्थूलदंतां
स्थूलोष्ठीं घर्घरस्वरां॥अतिकृष्णोरक्तवर्णां धूर्त्तांनैवोद्वहेद्विजः॥८॥सदारोदनशीलांचपां
डुवर्णांचकुत्सितां॥कासश्वासादिसंयुक्तां निद्राशीलांचनोद्वहेत्॥९॥अनर्थभाषिणींचैवक
दूषपरायणां॥परापवादनिरतांतस्करांनोद्वहेद्बुधः॥१०॥बालभावादविज्ञातः स्वभावा
मुद्वहेद्बुधः॥प्रागन्यामगुणांज्ञात्वा सर्वथातांपरित्यजेत्॥११॥दीर्घनासांचकितवांतनरू
हविदूषितां॥गर्वितांवरवृत्तांचसर्वथानोद्वहेद्विजः॥१२॥अन्नपुत्रवधूयानारोसर्वदानिष्ठुरांस्त्र
वेत्॥परानुकूलिनीचैवसर्वथातांपरित्यजेत्॥१३॥विवाहा विविधाप्रोक्ता ब्राह्म्यादिमुनिसत्त
माः॥सूर्वएवंवरोज्ञेयः पूर्वाभावेपरः परः॥१४॥ब्रह्मोदवत्यश्चैवार्षः प्राजापत्यस्तथासुरः॥गांध
र्वोराक्षसश्चैवपैशाचश्चाष्टमोमतः॥१५॥ब्राह्मेणवैविवाहेन विवहेद्वैद्विजोत्तमः॥अभा ॥९१॥

दवेनप्यथवाकुर्यात्किंचिदार्षप्रचक्षते॥१६॥प्राजापत्याविधानादयोविप्राविवाहापंचगर्हिताः॥
आभावेक्षत्रपूर्वेषुकुर्यादेवापरान्द्विजः॥१७॥यज्ञोपवीतद्वितयं सोत्तरीयंचधारयेत्॥सुवर्णकुंड
लेचैवधौतवस्त्रद्वयंतथा॥१८॥अनुलेपनलिप्तांगः कुर्यात्केशानखःशुचिः॥धारयेद्वैणवंदंडंसोदकं
चकमंडलुं॥१९॥छत्रंममलंछत्रंपादुकेचोपानहौ॥धारयेत्सुष्ठमालाश्चसुगंधाप्रियदर्शनः
॥२०॥नित्यंस्वाध्यायशीलस्यात्यथाचारंसमाचरेत्॥परान्नंनैवभुंजीतपरवादंचवर्जयेत्॥२१॥पा
देननार्द्रयेत्पादमुच्छिष्टेनैवलंघयेत्॥नसंहताभ्यांपाणिभ्यांकंडूयेदात्मनःशिरः॥२२॥एज्यं
देवालयंचैवनापसव्यंव्रजद्विजः॥देवार्चाचमनंस्नानंव्रतश्राद्धक्रियादिषु॥२३॥नभवेन्मुक्त
किकेशश्मश्रुनैकवस्त्रधरस्तथा॥नापिबेदुच्छपानंचशुष्कवादंचवर्जयेत्॥२४॥अन्यस्त्रीमिर्न
गछेन्नपैशून्यंचपरित्यजेत्॥नापसव्यंव्रजेद्विप्रःस्वल्पंचचतुष्पदं॥२५॥असूयामस्तरंचैवदि
वास्वापंचवर्जयेत्॥स्वधनंचस्वनक्षत्रं स्वमानंचाभिगोपयेत्॥२६॥दुर्जनैःसहसंवादोनाशास्त्रं
श्रुणुयात्तथा॥आसवद्यूतगीतेषु द्विजस्तुनरतिंचरेत्॥२७॥आदौस्नेहंधिराछिष्टंचंदस
र्योपतिष्ठंतथासंसुरंचषकंस्पृष्ट्वास्वासचेलंस्नानमाचरेत्॥२८॥चित्तिंचचितिशंचकंपंचोज्ञ

मेवच॥ स्पृष्ट्वादेवलकंचैवसवासाजलपविशेत॥२९॥दीपश्छायानतुच्छायाकेशवस्त्रंघटोद
कं॥आत्मोन्मार्जनरेणुश्चहंतिपुण्यंपुराकृतं॥३०॥रूपदानंप्रेतगृहंतथाशूद्रान्नभोजने॥वृष
लीपतिसंगंचदूरतःपरिवर्जयेत॥३१॥असच्छास्त्राभिगमनंखदानंनरवेक्षयोः॥नथैवन
रशयनंसर्वदापरिवर्जयेत॥३२॥गामश्वंशुंसकांचैवतथैवचचतुष्पथं॥देवतायतनंचै
वनापसव्यंव्रजद्विजः॥३३॥शिरोभ्यंगावशिष्टेननैलेनांगंनलेपयेत॥नांबूलमशुचिंनाद्यात्तथा
सुस्थंनबाधयेत॥३४॥नाग्निमग्निंपरिचरेत्पूज्याश्चगुरुदेवताः॥नचैवमहस्तेनैकेनपिबेद्वारिकृतं
वाजलं॥३५॥नचाक्रोशेद्गुरुंहन्यात्तदाशाश्चमुनीश्वराः॥निंदेद्वेषिणोविप्रान्नतिनोमपिय
स्तितथा॥३६॥परस्परस्यमर्माणिकदापिनवदेद्बुधः॥अदर्शेचपौर्णमास्यांचयागंकुर्याद्यथावि
धिः॥३७॥औपासनपरित्यागीसुरापीसुच्यतेबुधैः॥अयनेविषुवेचैवयुगादिषुचसत्तमाः॥३८॥
दर्शेचप्रेतपक्षेचश्राद्धंकुर्याद्गृहेद्विजः॥मन्वादिषुमृताहेचअष्टकादिषुसत्तमाः॥३९॥नवयो
न्यसमायातेगृहेश्राद्धंसमाचरेत्॥श्रोत्रियेगृहमायातेग्रहणेचंद्रसूर्ययोः॥४०॥पुण्यक्षेत्रेषुती
र्थेषुगृहेश्राद्धंसमाचरेत्॥यज्ञेदानंतथाहोमःस्वाध्यायःपितृतर्पणं॥४१॥वृथाभवतिवि

प्रेंद्राऊर्ध्वपुंड्रंविनाकृतंऊर्ध्वपुंड्रंचतुलसींश्राद्धेप्रेनेछंतिकेचन॥४२॥वृक्षाचारःपरिग्रा
सस्तस्माद्धेयोर्थिभिर्नरैः॥इत्येवमादयोधर्माःस्मृतिषुगीताःप्रचोदिताः॥४३॥कार्याद्विजानिभिः
सम्यक्सर्वकामफलप्रदाः॥सदाचारपरायैस्तुतर्षोविष्णुःप्रसीदति॥४४॥विष्णोप्रसन्ननतां
यातेकिमसाध्यंशरीरिणां॥४५॥ ॥ ६॥ इतिश्रीबृहन्नारदीयेपुराणेचर्यापादेशोध्यायः॥ बृ
२४॥सूतउवाच॥गृहस्थस्यसदाचारंवक्ष्यामिमुनिसत्तमाः॥कुर्वतांसर्वपापानिनश्यंते
वनसंशयः॥१॥ब्राह्मेमुहूर्तेचोत्थायपुरुषार्थविरोधिनी॥वृत्तिंसंचिंतयेद्विप्राःकृतकेशप्र
साधनाः॥२॥दिवासंध्यासुकर्मस्थब्रह्मसूत्रउदङ्मुखः॥सिरःप्रावृत्यवस्त्रेणअंतर्धायकर
णोमहीं॥३॥वह्निकाष्ठंकरेणोर्वंतावन्मौनीभवेद्द्विजाः॥पश्चिमोत्तरदीतीरेतटागेपंचसंनि
धौ॥४॥तुषांगारकपालेषुजलमध्येतथैवच॥देवालयेतथायानेकाष्ठभूमौचतुष्पथे॥५॥ब्राह्मणा
नांसमीपेतुतथागोगुरुसन्निधौ॥एवमादिपुदेशेषुमलमूत्रंनकारयेत्॥६॥शौचयत्नःसदाका
र्यःशौचमूलोद्विजःस्मृतः॥शौचाचारविहीनस्यसमस्तंकर्मनिष्फलं॥७॥शौचंचद्विविधंप्रो

क्तं बाह्यमभ्यंतरंतदा॥ मृज्जलाभ्यांबहिःशुद्धिःभाव शुद्धिस्तथांतरे॥८॥ गृहीतशिश्नस्योथायशौचा
र्थंमृत्तिकांहरेत्॥९॥ गंधलेपक्षयकरं शौचंकुर्यात्प्रयत्नतः॥१०॥ अनुच्छिष्टप्रदेशेषु शौचार्थंमृत्ति
कांहरेत्॥ नचयूकादिसहितांहलोत्खननतथैवच॥११॥ वापीकूपतडागेषुनाहरेद्वाप्यमृत्तिकां॥ शौचं
कुर्यात्प्रयत्नेनआदायोजलिनामृदं॥१२॥ एकोमृदेकादातव्यातिस्रोवाप्रदयाद्बुधैः॥१३॥ अपानेपंचवा
मिनुदशासप्ततथोभयोः॥ तिस्रस्तिस्रःप्रदातव्यापादयोर्मृत्तिकाःपृथक्॥१४॥ एवंशौचंप्रकुर्वीतगं
धलेपापनुत्तये॥ एतच्छौचंगृहीतस्यद्विगुणंब्रह्मचारिणां॥१५॥ त्रिगुणंतुवनस्थानांयतीनांचतुर्
गुणं॥ स्वग्रामेसर्वमाचारंपथार्द्धंमुनिसत्तमाः॥१६॥ आतुरेनियमानास्तिमहापादितथैवच॥ गंधले
पक्षयंशौचंकुर्वीयान्मुनिसत्तमाः॥१७॥ स्त्रीणामन्त्यनीतानांगंधलेपक्षयाविधिः॥ व्रतस्थानां
चसर्वेषांयतिवच्छौचमिष्यते॥१८॥ विधवानांचसर्वेषां विप्रेंद्रा एवंशौचंप्रकीर्तितं॥ एवंशौचंमुनिवृ
त्यपश्चाद्दसुसमाहितः॥१९॥ प्राङ्मुखोदङ्मुखोवापि आचमेत्प्रयतेंद्रियः॥ त्रिश्चतुर्वापिबेद्वापि
गंधफेनाविवर्जितः॥२०॥ द्विर्मार्जयेच्चदशिणातलेनौष्ठौचसत्तमाः॥ तर्जन्यंगुष्ठयोगेननासि

देशास्पृशेद्द्विजाः॥२१॥ तलेनोरस्तलेनैव अंगुल्याग्रैःशिरस्पृशेत्॥ तलेनांगुल्यग्रैर्वास्पृशेद्दंसौ
विचक्षणः॥२२॥ एवमाचम्यविप्रेंद्रा शुद्धिमाप्नोत्यनुत्तमां॥ ततस्नानंप्रकुर्वीत मार्जनंजलतर्प
णं॥२३॥ ततःसंध्यामुपासीतसावित्र्यार्घंत्रयेक्षिपेत्॥ गायत्रींचजपेत्सम्यक्शिष्टाचारसमन्वितः
॥२४॥ तत्रैवसायमासीनोजपेदारक्षदर्शनात्॥ उपास्यसंध्यांमध्यान्हेक्षिपेदर्घंत्रयंबुधः॥२५॥ गाय
त्रींचजपेत्सम्यक्शिष्टाचारसमन्वितः॥ प्रातर्मध्यंदिनेचैव ग्रहस्थःस्नानमाचरेत्॥२६॥ व्रतस्थंचप्रकु
र्वीतदर्भपाणिर्मुनीश्वराः॥ दैवोदितानित्यकर्मणिप्रमादादकृतेनचेत्॥२७॥ सर्वथाप्रथमेयामेतानि
कुर्याद्यथाक्रमं॥ नोपास्यद्विजसंध्यांघूर्त्तोमत्तोन्मत्तोहिनापदि॥२८॥ पारवेदः सहिविज्ञेयोसर्वधर्मे
बहिष्कृतः॥ यस्यसंध्यादिकर्माणिकृतयुक्तिविशारदः॥२९॥ परित्यजतितंवित्तं यांप्रहापातकिनं
वरं॥ येद्विजाइतिभाषंत स्तेक्तसंध्यादिकर्मिणः॥३०॥ तेयांतिनरकान्घोरान्यावदाचंद्रतारकं
देवार्चनंततःकुर्यादुच्चदेवंयथाविधि॥३१॥ आयांतमतिथिंसम्यगर्हणादैश्चपूजयेत्॥ व
क्ष्यामधुरावाणीआतिथेष्वगतेषुवै॥३२॥ जलान्नकंदमूलैर्वागृहदानेनवार्चयेत्॥ आ

थिर्यस्यभग्नाशोगृहीतस्मिन्निवर्त्तते ३१ सतस्यपुण्यमादायगच्छेद्वनसंश्रयः अज्ञातगोत्र
नामानमन्यग्रामागतं ३२ विप्रश्रितोतिथिंप्राहुर्विदुषांकंप्रदूषयेत् प्रतिपद्यैर्यथा
ग्रामवासिनांह्येकंश्रोत्रियंविश्रुतंसदा ३३ अन्नार्थेप्रसहंविप्रोऽदृश्यस्वपितृयज्ञवत्
यइहापिस्मागीब्रह्महेत्यच्यतेबुधैः ३४ कुर्यादहरहस्तस्मान्पंचयज्ञान्प्रयत्नतः देवयज्ञोभूत
यज्ञःपितृयज्ञस्तथैवच ३५ नृयज्ञोब्रह्मयज्ञश्चपंचयज्ञाःप्रकीर्त्तिताः मित्रभूतादिसंयुक्तः
स्वयंभुंजीतवाग्यत ३६ यावद्विजातिनाज्ञायासात्रंचैवपरिग्रहेत् तंप्राप्यह्यासनेपादौ
वस्त्रार्धंपरिधायच ३७ मुखेनार्धमितंभुक्त्वासुरापास्यच्यतेबुधैः खादितार्धंपुनः खादेन्नोदक्य
दिफलानिच ३८ प्रस्यक्षलवणंचैव गोमांसात्रीनिगद्यते आपोशनेवाचमनेपेयद्रव्येषु
वातथा ३९ शब्देनकारयेद्विप्राः कुर्याच्चेसातकीभवेत् पश्यमन्यंप्रभुंजीतवाग्यतोन्नम
कुत्सयन् ४० ततःस्नात्वाविप्रेंद्राः शास्त्रचिंतापरोभवेत् रात्रावपियथाशक्त्याध्ययनाश्र
नक्तोजनेः ४१ कंदमूलफलैर्वापि आयांतमतिथिंयजेत् एवंगृहीसदाचारं कुर्यात्तिदि

॥नार०॥ ॥९४॥

नंबुधः ४२ यथाचारपरित्यागीप्रायश्चित्तीभवेध्रुवं दूषितांस्वतनुंदृष्ट्वापलितादेश्चसत्तमाः
४३ पुत्रोभार्यांविनिक्षिप्यवनंगच्छेत्सहैववा भवेत्रिषवणस्नायीनरश्चमभृजटाधरः ४४
अधःशायीब्रह्मचरीपंचयज्ञपरायणः फलमूलाशनोनित्यंस्वाध्यायनिरतस्तथा ४५ दया
वान्सर्वभूतेषुनारायणपरायणः त्यजेयुर्ग्रामजातानिपुष्पाणिचफलानिच ४६ अष्टौग्रासान्
भुंजीतनकुर्याद्रात्रिभोजनं अभ्यवन्यतुतेनैवानप्रस्थःसमाचरेत् ४७ वानप्रस्थःप्रकुर्वी
तत्रपःश्चांद्रायणादिकं सहेत्तापादिंवह्निंपरिचरेत्सदा ४८ यदामानासिवैराग्यंतापंस
र्वेषुवस्तुषु तदैवसन्यसेद्विद्वान्नान्यथापतितोभवेत् ४९ वेदाभ्यासेषुनिरतः शांतोदांतो
जितेंद्रियः निर्द्वंद्वोनिरहंकारो निर्ममःसर्वदाभवेत् ५० शमादिगुणसंपुष्टः क्तः कामक्रो
धविवर्जितः नग्नोवाजीर्णकौपीनोभवेन्मुक्तोयतिर्द्विजः ५१ समः शत्रौचमित्रेचतथामानाप
मानयोः एकरात्रंवसेद्ग्रामेत्रिरात्रंनगरेवसेत् ५२ भैक्षेणाकल्पयेन्नित्यंनैकान्नादीभवेद्यतिः
अनिंदितद्विजगृहेष्वगारेष्वमुक्तवर्जने ५३ विवादरहितेचैवभिक्षार्थंपर्यटेद्यतिः भवेत्रि

सीत

षवणस्नायीनारायणपरायणः॥५८॥जपेत्प्रणवंनित्यंयत्नाद्विजितेंद्रियः॥एकाग्रादीभवेद्य
स्तुकदाचिल्लुप्यतेयदि॥५९॥तस्यनिष्कृतिंहितप्रायश्चित्तायुतैरपि॥विप्रायादद्यतिर्लोभात्प्रवृ
द्धतर्षोभवेत्॥६०॥सचांडालसमोज्ञेयोवर्णाश्रमविगर्हितः॥आत्मानंचिंतयेद्देवंनारायणमनाम
यं॥६१॥निर्द्वंद्वंनिर्ममंशांतंमायातीतमम्मसं॥अव्ययंपरिपूर्णंचसदानंदैकविग्रहं॥६२॥ज्ञानस्वरू
पममलंपरंज्योतिःसनातनं॥अविकारमनाद्यंतंजगत्त्रितयकारणं॥६३॥त्रिगुणंपरमंध्यायेद्
यानंचपरात्परं॥षष्ठेदुपनिषद्वाक्येवेदांतार्थैश्चचिंतयेत्॥६४॥सहस्रशीर्षंदेवंसदाध्यायेज्ज्ञि
तेंद्रियः॥एवंध्यानपरोयस्तुयतिर्विगतमत्सरः॥६५॥सयातिपरमानंदंपरंज्योतिःसनातनं॥
सूतउवाच॥इत्येतन्माश्रमाचारान्यःकरोतिदिनेदिने॥६६॥सयातिपरमंस्थानंयत्रगत्वान
शोचति॥वर्णाश्रमाचारयुतःसर्वपापविमोचितः॥नारायणपरोयातिततोविष्णोःपरंपदं॥६७॥
इतिश्रीबृहन्नारदीयपुराणेचतुर्वेशोध्यायः॥२५॥सूतउवाच॥शृणुध्वमृषयःसर्वेश्राद्ध
स्यविधिमुत्तमं॥यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥१॥विप्रःक्षयाहपूर्वेद्युःस्नात्वा॥

वैकास्नेभवेत्॥अधःशायीब्रह्मचारीनिशिविप्रान्निमंत्रयेत्॥२॥दंतधावनतांबूलतै
लाभ्यंगतथैवच॥स्त्रीषुचपरान्नानिश्राद्धकर्तृविवर्जयेत्॥३॥श्राद्धेनिमंत्रितोयस्तुमैथुनंकुरु
तेयदि॥ब्रह्महत्याभवेत्तस्यनिरयेपततेध्रुवं॥४॥श्राद्धेनियोजितंविप्रंश्रोत्रियंविद्युतस्यं
तथास्वाचारनिरतंप्रशांतंसत्कुलोद्भवं॥५॥रागद्वेषविहीनंचपुरुषार्थविशारदं॥त्रिमधुत्रिसु
पर्णज्ञंसर्वभूतदयापरं॥६॥द्विवृद्धारतंचैवस्मृतितत्त्वविशारदं॥वेदांततत्त्वसंपन्नंसर्वभूत
हितेरतं॥७॥कृतज्ञंगुणसंपन्नंगुरुशुश्रूषणेरतं॥परोपदेशनिरतंसच्छास्त्रकथनेरतं॥८॥
एतान्नियोजयेद्विप्रान्मुनीश्चसः॥श्राद्धेवर्ज्यान्प्रवक्ष्यामिशृणुध्वंगदतोमम॥९॥न्यूनांगंचाधिकांगंचकदर्यंरोगिणंतथा॥कुष्ठीचकुनखीचैवलंपटःकर्णसूचकः॥१०॥
नक्षत्रपाठजीवीचतथैवग्रामयाचकः॥कुवादीदीर्घवैद्यश्चतथादेवलकठः॥११॥निंकदको
मर्षणोधूर्त्तःतथैवग्रामदाहकः॥असच्छास्त्रक्रियानिरतःपरान्ननिरतस्तथा॥१२॥वृषलीसुत
वाएतेवृषलीपतिरेवच॥कुंडगोलकश्चैवतथाज्ञानंचयाजकः॥१३॥दंभाचारोवृथा
रूढोअन्यस्त्रीधनतत्परः॥विष्णुभक्तिविहीनश्चशिवभक्तिपराङ्मुखः॥१४॥वेदक्रियक

श्चैवस्मृतिविक्रयकस्तथापुराणविक्रयीचैवमंत्रविक्रयणस्तथा १५ यागकाःकार्यकर्त्तारोभि
षक्पत्न्यापजीविनश्च वेदनिंदापरश्चैवविप्रनिंदापरस्तथा १६ नित्यराजोपजीवीचकृतघ्नकि ॥नर०॥
तवस्तथा सदागानपरश्चैवद्यूतपानपरायणश्च १७ मिथ्याभिवादिनश्चैवग्रामारण्यप्रदाहकः
तथातिकामुकश्चैववार्द्धुषिरसविक्रयी १८ रूक्षयुक्तिरतश्चैवश्राद्धब्रह्मीःप्रयत्नतः विमं
त्रितश्राद्धपूर्वेद्युस्तस्मिन्नेवदिनेतथा १९ निमंत्रितोभवेद्विप्रोब्रह्मचारीभवेद्विजः श्राद्धक्ष
याःप्रकर्त्तव्यःप्रसाश्चैतिसत्तमाः २० निमंत्रयेद्विजंप्राज्ञंदर्भपाणिजितेंद्रियः प्रातःस
मुत्थायपरंकार्यंकर्त्यंकर्मसमाचरेत् २१ श्राद्धंसमाचरेद्विद्वान्कालेकुत्तुपसंज्ञितेदिवसस्या
ष्टमेभागेयदामंदायतेरविः २३ सकालःकुत्तपोनाम्नापितॄणांदत्तमक्षयं अपराह्णःपित्र्
याणांतुदत्तःकालःस्वभुवा २४ तत्कालएवदातव्यंकर्त्तव्यंतुद्विजोत्तमैः यत्कव्यंदीयतेवि
धेरकाले मुनिसत्तमाः २५ राजसंतत्स्मृतंविद्येपितॄणांनापसर्पति कव्यंदत्तंतुसायाह्ने
तामसंतद्विधीयतेः २६ दातानरकमाप्नोतिभोक्तावनरकंव्रजेत् क्षयाहस्यतिथेर्यातु
यदियुक्तातिथिर्भवेत् २७ व्याप्तापराण्हकायांतुश्राद्धंकार्यंविजानता क्षयाहस्यतिथि ॥९६॥

र्विप्रा अपराण्हद्वयेयदि २८ पूर्वेद्युरेवकर्त्तव्यासधौकार्यातथोत्तरा मुहूर्तद्वितयंचैवपूर्वदि
नेस्यादपरेहनी २९ तिथिःसायाह्नगायास्यात्सोकव्यस्यविश्रुता केचित्पूर्वदिनंप्राहुर्मुहू
सेवकाः॥देवाकेप्यत्रजायंतेलोकानुग्रहतत्पराः॥६॥कर्मणामनसावाचायोर्चयेच्चक्रिताहरिं॥सया
तिपरमंस्थानंसर्वलोकोत्तमं॥७॥अत्रैवोदाहरंतीममितिहासंपुरातनं॥पठतांश्रुण्वतां
चैवसर्वपापप्रनाशनं॥८॥विप्राःश्रुणुध्वंचरितंयज्ञमालिसुमालिनोः॥यस्यश्रवणमात्रेवव्याज
प्रेधफलंलभेत्॥९॥काश्चिदासीत्पुराविप्राब्रह्मलोकेविनेतरः॥देवमालिरितिख्यातोवेदवेदांगपा
रगः॥१०॥सर्वभूतदयायुक्तोहरिपूजापरायणः॥पुत्रमित्रकलत्रार्थेधनार्जनपरोभवेत्॥११॥
अपण्यविक्रयंचक्रेतथैवरसविक्रयी॥चौरशालायेरतिथाप्रतिग्रहकरोभवेत्॥१२॥तपसोविक्र
यंचक्रेव्रतानांविक्रयंतथा॥परार्थंतीर्थगमनंकलत्रार्थेचकारह॥१३॥कालेनविप्राजग्राहेक्षां

तौत्तस्यसुतावुभौ॥यज्ञमालिःसुमालीच अमलावतिशोभनौ॥२४॥तृष्टातोहुकुमारौचपितास्नेहान्वितोभवत्॥पोषयामासवात्सल्याद्देभोमोहमिवाशने॥२५॥बहूपायैर्वदमालीधनंसंपाद्ययत्नतः॥स्वधनंगणयामासकियत्स्यादितिवेदितुं॥२६॥निष्ककोटिसहस्राणांकोटिकोटिगुणान्वितं॥विगण्यस्वयंहृष्टोविस्मितश्चाथचिंतयन्॥२७॥अस्त्रशस्त्रिग्रहैश्चैवअपण्यानांचविक्रयैः॥मयानपाविक्रयाप्तैश्चैनधनमुपार्जितं॥२८॥अद्यापिशांतिनपन्नाममृष्णासुदुःसहाःमरुतुल्यसुवर्णानिअसंख्यानिवांछति॥२९॥अहोमनोमहाकष्टंसमस्तक्लेशसाधनं॥सर्वान्कामानवाप्यापिपुनरन्यच्चवांछति॥३०॥जीर्यंतिजीर्यतःकेशादंतानाजीर्यंतिजीर्यतः॥चक्षुश्रोत्रंचजीर्यंतितृष्णैकातरुणायते॥३१॥ममेंद्रियाणिसर्वाणिमंदभावंव्रजंतिच॥बलंहृतंचजरसातृष्णातरुणतांगता॥३२॥कष्टासावर्त्ततेयस्यसविद्वान्पंडितश्चसुशांतंमेमनोनस्याद्धीमान्यतिर्मूढधीः॥३३॥आशाभंगकरीपुंसामजेयारजसंनिभा॥तस्मादाशांपरित्यज्यसुखंशांतंसुखंवसेत्॥३४॥बलंतेजोयशश्चैवविद्यामानंचवृद्धता॥तथैवसत्कु

॥नारद॥
॥१२२॥

लेजन्मआशाहंत्यतिवेगतः॥३५॥नृणामाशा॥कथितंभूतनाथाश्चर्यमिदमुच्यते॥किंचिद्दातापिचोजालस्तस्मादधिकतांगतः॥३६॥आशाकिंभूतायमर्त्यामहामोहमदास्पदः॥अवसानादिजंदुरवंनजानंतितदप्यहो॥३७॥मयाप्येवंबहूपायैःकुशैस्तेधनमुपार्जितं॥शरीरंमजीर्णंचजरसाभक्षितंबलं॥३८॥अतःपरंयतिष्यामिपरलोकार्थमादरात्॥एवंनिश्चित्यविप्रेंद्राःधर्ममार्गरतोभवत्॥३९॥सर्वस्वधनंसर्वंचतुर्धाव्यभजत्तदा॥स्वयंभागद्वितयमार्जनकलत्रदुहादे॥३०॥तोषंचभागद्वितयंपुत्रयोरुभयोरपि॥स्वनार्जितानांपापानांनाशकल्यमनास्तदा॥३१॥प्रपातडागारामांश्चतथादेवग्रहान्बहून्॥दीनानांचैवदानानिगंगातीरेचकारसः॥३२॥एवंधनविशेषंचविभाणायनिभक्तिमान्॥नरनारायणस्थानंजगामतपसेवने॥३३॥तत्रापश्यन्महारण्यमाश्रमंमुनिसेवितं॥फलैतैःपुष्पितैश्चैवसेवितंवृक्षसंकुलैः॥३४॥गृणद्भिःपरमंब्रह्मशास्त्रचिंतापरैस्तथा॥परिचर्यापरैश्चापिमुनिभिःपरिशोभितं॥३५॥शिष्यैःपरिवृतंतत्रमुनिंजानंतिसंस्थितं॥गृणंतंपरमंब्रह्मतेजोराशिंददर्शह॥३६॥रामादिगुण

संयुक्तंरागादिरहितंमुनिं॥शीर्णपर्णाशनंदृष्ट्वादेवमालिर्महामतिः॥३७॥तस्यज्ञानेतिसंहृष्य
कृत्यंमासन्नहर्षणं॥कंदमूलफलैश्चान्यैर्नारायणधियातदा॥३८॥कृतातिथ्यक्रियस्तेनदेव
मालिःकृतांजलिः॥विनयावनतोभूत्वाप्रोवाचवदतांवरः॥३९॥देवमालिरुवाच॥भगव
न्कृतकृत्योस्मिविगतंकलुषंमम॥मामुद्धरमहाभागज्ञानदानेनपंडित॥४०॥सूतउवाच॥
एवमुक्तस्ततस्तेनज्ञानंतिमुनिसत्तमः॥उवाचप्रहसन्वाणींदेवमालिंगुणान्वितं॥४१॥
ज्ञानंतिरुवाच॥शृणुष्वविप्रशार्दूलसंसारच्छेदकारणं॥प्रवक्ष्यामिसमासेनदुर्लभंदु
ष्कृतात्मनां॥४२॥भजविष्णुंपरंनित्यंस्मरनारायणंप्रभुं॥परापवादंपैशून्यंकदाचिदपि
माकृथाः॥४३॥परापवादविगतःसदाभवमहामते॥हरिपूजापरश्चैवत्यजमूर्खसमागमं
॥४४॥कामंक्रोधंचलोभंचमोहंचमदमत्सरौ॥परित्यज्यात्मवह्नोकेमत्वाशांतिंगमिष्यसि॥४५॥
असूयांपरनिंदांचकदाचिदपिमाकृथाः॥दंभाचारमहंकारंनिष्ठुरंचपरित्यज॥४६॥
दयांकुरुष्वभूतेषुशृण्वतांचतथासतां॥त्वयाकृतांश्चधर्मार्थान्यथार्थंवदपृच्छतां॥४७॥

अनाचाररतान्दृष्ट्वाचोपेक्षांकुरुशक्तितः॥प्रजयस्वातिथीन्नित्यंस्वयमेवाविरोधतः॥४८॥
पत्रैःपुष्पैःफलैर्वापिदूर्वाभिःपल्लवैस्तथा॥पूजयस्वजगन्नाथंनारायणमनामयं॥४९॥
देवानृषीन्पितॄंश्चैवतर्पयस्वयथाविधि॥अग्नेश्चाराधनेविप्रपरिचर्यापरोभव॥५०॥देव
तायतनेनित्यंसंमार्जनपरोभव॥तथैवलेपनेश्चैवकुरुष्वसुसमाहितः॥५१॥शीर्णस्फुटित
संधानंकुरुष्वदेवगृहेसदा॥एंहिरोभांचदीपानांविष्णोरायतनेकुरु॥५२॥कंदमूलफलैर्वा
पिसदापूजयमाधवं॥प्रदक्षिणेनमस्कारैःस्तोत्राणांपठनैस्तथा॥५३॥पुराणश्रवणंचै
वपुराणाचरणंतथा॥विदानपठनंचैवकुरुष्वप्रत्यहंद्विज॥५४॥एवंह्येतत्तवज्ञानंभवि
ष्यत्युत्तमोत्तमं॥दानानांसमस्तपापस्यमोक्षमाकुर्विपश्चितः॥५५॥सूतउवाच॥एवंप्रबोधित
स्तेनदेवमालीद्विपाश्रितः॥तदाज्ञानरतोनित्यंज्ञानलेशमवाप्तवान्॥५६॥देवमालिःक
दाचित्तुत्रासेनप्रचोदितः॥कोहंममक्रियाकेतिस्वयमेवविचारयन्॥५७॥ममजन्मकथं
जातंरूपंकीदृग्विधंमम॥एवंविचारयामासचिंताकुलितमानसः॥५८॥मुनिश्चेतमतिः
सचोदेवमालिर्द्विजोत्तमः॥पुनर्ज्ञानंनिमागस्यप्रणम्येदमुवाचह॥५९॥देवमालिरुवा॥

ममचित्तमतिप्रज्ञेतं गुरोब्रह्मविदांवर॥कोहंममक्रियाकाचममजन्मकथंवद॥६०॥ज्ञानंतिन्॥
स्यप्राहमहमहाभागचित्तंभ्रांतंसुनिश्चितं॥अविद्यानाशयेच्चित्तं कथंसद्भावमाप्नुयात्॥६१॥
मितिगदतेजंतुस्तदपिभ्रांतिरिष्यते॥अहंकारोमनोधर्मोब्रह्मणोनहिपंडित॥६२॥पुनः
श्चकोहमित्युक्तंदेवमालेत्वयामुने॥नामजात्यादिशून्यस्य कथंनमकरोम्यहं॥६३॥अ
रूपस्यस्वभवस्यनिर्गुणस्यपरात्मनः॥निरूपस्याप्रमेयस्यकथंरूपादिकथ्यते॥६४॥परंज्यो
तिस्वरूपस्यकथंनामकरोम्यहं॥अपरिछिन्नमाभाष्यकथ्यतेचकथंक्रिया॥६५॥अप्रका
शात्मनोविप्रनित्यस्यपरमात्मनः॥अनंतस्यत्रिपातस्यकथंजन्मचकथ्यते॥६६॥अनि
वेद्यजन्मजरंपरंब्रह्मसनातनं॥पारदर्शीसदानंदंतस्मात्त्वंविहिद्विजा॥६७॥नत्वमस्या
दिवाक्यात्तुज्ञानंमोक्षस्यसाधनं॥ज्ञानेचानाहितेसिद्धेसर्वंब्रह्मसमंभवेत्॥६८॥सूतउवाच
एवंप्रबोधितस्तेनदेवमालिर्मुनीश्वरः॥मुमोदज्ञानमासाद्यमन्येवाचुतंप्रभुं॥६९॥उपाधिवर्जि
तंब्रह्मस्वभासंसंस्मरंजनः॥अहमेवेतिनिश्चित्यपरांशांतिमवाप्नवान्॥७०॥तदयंव्यवहा॥१२३॥
रार्थंदेवमालिर्मुनीश्वरः॥गुरुंप्रणम्यजानंतंसदाध्यानपरोभवत्॥७१॥गतेबहुतिथे

कालेदेवमालिर्महामतिर्गुणाकरः॥सोपुरंप्राप्यपरंमोक्षमवाप्तवान्॥७२॥यइदंपठतेध्यायं शृणुयाद्वासमाहितः॥सकर्मपापविच्छेदंसंप्राप्यसुखमश्नुते॥७३॥॥॥॥इतिबृहन्नारदीयेपुराणेत्रयस्त्रिंशो ध्यायः॥३३॥सूतउवाच॥देवमालेःसुतोप्रीतोयाज्ञवल्क्योमुनिसत्तमाः॥१॥यज्ञमालीसुमालीचतयोः कर्मविधोर्यते॥ज्ञातयोरार्षेयज्ञमालीविभेदेधनसंचितं॥धनंद्विधाकनिष्ठस्यभागमेकंददौतदा॥२॥
सुमालीतद्धनंसर्वंव्यसनाभिरतस्तदा॥प्रसक्तानादिभिश्चैवनाशयामासहिद्विजाः॥३॥गीत्वा
यरतोनित्यंमद्यपानरतोभवत्॥वेश्याविक्रमतुष्यस्तुपरदारतोभवत्॥४॥तस्मिन्नाशेसमायाते
हरण्येपितसंचिते॥अपहृत्यपरद्रव्यंवारस्त्रीनिरतोभवत्॥५॥दृष्वासुमालिनःशीलं यज्ञमाली
महामतिः॥बभूवदुखितोगाढं गछत्यनुजमब्रवीत्॥६॥यज्ञमालीउवाच॥अलंमत्यंतकष्टेनवि
त्तेनानुजमेकुले॥त्वमेवैकंदुष्टसंगा महापारतोभवत्॥७॥सूतउवाच॥एवंनिर्वेदंतंचसमवेक्ष्या
त्मनंततः॥हनिष्यामीतिनिश्चित्यखड्गधृक्तंकरेगृहात्॥८॥ततोहाहारवोजज्ञेनगरेमुनिसत्तमाः॥
बबंधुनगरश्चैनंकुपितास्तेसुमालिनः॥९॥यज्ञमालीरमेयस्मावोरान्संप्रार्थ्यदुखितः॥बंधना
न्मोचयामासभ्रातृस्नेहविमोहितः॥१०॥यज्ञमालीपुनश्चापिबभेदस्वधनंद्विधा॥प्रादात्स्वय

मर्धचदद्योत्तसेकनायसेन॥१॥सुमालीत्तिमूढात्मानश्चनेनापिसत्तमाः॥मूरवैः पाषांउचोंजालैर्बुभुजेत्र
मदोन्नतः॥१५॥असतामुपिभोगायदुर्जनानांविभूतयः॥पिचुमंदफलाढ्योपिकाकैरेवहिभुज्यते ॥नारद॥
॥१३॥क्वात्रादत्तंधनंप्राप्यसुमाल्यासत्तमांगतः॥शर्करासहितंदुग्धंपीत्वेवपवनाशनः॥१४॥सुमालीत्व
त्तिमूढात्मानांडजत्वमुपागतः॥प्रध्यपानप्रमत्तश्चगोमांसादीन्यभक्षयत्॥१५॥त्यक्तोबंधुजनैः
सर्वैश्चांडालस्त्रीसमन्वितः॥राज्ञाहिबाधितश्चापिप्रवेदेनिर्जनेवने॥१६॥यज्ञमाली मुनिर्विप्रः स
दाश्रमपरोभवत्॥स्ववारिनंददावर्घंसज्ञवंगतकल्मषं॥१७॥पित्राकृतानिसर्वाणिनडागादीनि
सत्तमाः॥अपाठयद्यज्ञमालीसत्यमाचीधर्मपरायणः॥१८॥विश्राणितंधनंसर्वंयज्ञमालेर्महात्मनः॥
सत्पात्रदाननिरतस्यधर्ममार्गप्रवर्तिनः॥१९॥अहोसुपभोगायसज्जनानांविभूतयः॥कल्पवृक्षफ मु
लंसर्वप्रभरेरेवभुज्यते॥२०॥धनंविश्राण्यधर्मार्थंयज्ञमालिर्महामतिः॥नित्यंविष्णुंगृहेसम्य
क्पर्यचर्यापरोभवत्॥२१॥कालेनगच्छतातोतुवृधभावमुपागते॥यज्ञमाली सुमालीचैककालेन
मृतौद्विजाः॥२२॥हरिपूजापरस्यास्ययज्ञमालेर्महात्मनः॥हरिःसंप्रेषयामासविमानशतमुत्तमं
॥२३॥दिव्यंविमानमास्थययज्ञमालिर्महामतिः॥गंधर्वैर्गीयमानश्चअप्सरोभिश्चसेवितः॥१२४॥

कल्पवृक्षसमाकीर्णश्चित्राभरणभूषितः॥कोमलैस्तुलसीमाल्यैर्भूषितस्तेजसांनिधिः॥२५॥ततः ज
विष्णुपुरंदिव्यमनुसंपश्यितृष्टवान्॥यज्ञमालिर्दयायुक्तोहरिदूतान्समागतान्॥२६॥कोयंभटै
र्बध्यमानइत्यपृच्छत्ततः॥जलिं॥अथतेहरिदूतास्तंयज्ञमालिंमहोजसं॥२७॥असौसुमाली
क्रूरात्मातेपापात्माइत्यूचोदयन्॥यज्ञमालिःसमाकर्ण्यअख्यातोविष्णुकिंकरैः॥२८॥मनसा
दुःखमापन्नःपुनःपप्रच्छतज्जनः॥यज्ञमालिस्त्वाचाकथमस्यभवेन्मोक्षस्त्वाज्ञिनैःपापसंचयैः॥२९॥
तदुपायंवदध्वंवैसादतोहिवोभवः॥सत्यंसत्पदीनंस्यादित्याहुर्धर्मकोविदुः॥३०॥तस्या
र्थंजानन्तोयूयंतदुपायंवदध्वंवै॥॥सूतउवाचायज्ञमालेर्वचःश्रुत्वाहरिदूतादयापराः॥३१॥
पुनःस्मितमुखाभूत्वादेवमालिंहरिप्रियंविष्णुदूताऊचुः॥यज्ञमालेमहाभागनारायणपरा
यण॥३२॥उपायंतत्रवक्ष्यामःशृणुष्वत्वंसमाहितः॥कृतंतुसुमहत्कर्मत्वयाप्राक्तनजन्मनि॥३३॥
प्रवक्ष्यामःसप्रासेनशृणुष्वसुसमाहितः॥पुरात्वंवैश्यजातीयोनाम्नाविश्रवसःस्मृतः॥३४॥त्वया
कृतानिपानानिमहोद्यगणितानिवै॥स्वकर्मवासनाहीनोमातापित्रोश्चयोजकः॥३५॥एकदा
बेभुक्तिस्त्वक्तशोकसंतापवर्जितः॥क्षुधाग्निनापिसंतप्तःप्राप्तवान्हरिमंदिरं॥३६॥तत्रवृष्टिः

समुद्धृत्य कर्दमं हंतुमिछया॥निवारितस्त्वयासोपिउपलेपनतांगतः॥३७॥उपोषितश्चतत्रत्यो तस्मै
दत्वाउर्ये द्विजायेषणदंहित स्तत्रप्राप्तः पंचत्वतांगतः॥३८॥तेन पुण्यप्रभावेन उपलेपन जेनते॥
विप्रजन्मचतत्रापिहरिभक्तिरचंचला॥३९॥कल्पकोटिशतंसार्धं गोवानस्यहरिसंनिधौ॥त
त्रैज्ञानमासाद्यपरंमोक्षंगमिष्यसि॥४०॥अनुजंपातकिश्रेष्ठं यदिमोक्षंत्वमिछसि॥उपायंचप्रव
क्ष्यामः तच्छृणुष्वमहामुने॥४१॥गोवर्ममात्रभूमेस्तु उपलेपन जंफलं॥दत्तेश्वरमहाभागततः श्रेयो
वाप्स्यसि॥४२॥सूतउवाच एवमुक्तस्ततस्तेसुयज्ञमालिर्महामतिः॥दत्वादूनोक्तमात्रंतुददौतस्मैफलंत
दा॥४३॥विनष्टमभवत्तस्यपापजालंमुनीश्वराः॥यमाज्ञाकारिणः सर्वेतंविमुच्यप्रदुद्रुवुः॥४४॥
विमानमागतंसद्यः सर्वभोगसमन्वितं॥समारुह्यसुमालीचमुमुदेदेववत्तदा॥४५॥तावुभौपुत्रा
नरौविप्रादेववृंदनमस्कृतौ॥अवापतुर्महाप्रीतिं समालिंग्यपरस्परं॥४६॥यज्ञमालिः सुमालीच
स्तूयमानौमहर्षिभिः॥गीयमानौचगंधर्वैर्विष्णुलोकंमुपागतौ॥४७॥अवापहरिसारूप्यं
सुमालीद्विजसत्तमाः॥यज्ञमालीचधर्मात्माहरिसारूप्यमापूवान्॥४८॥भुक्त्वाभोगांश्चिरंतत्र
यज्ञमालिमहामतिः॥तत्रैवज्ञान संपन्नः परंमोक्षमुपागतः॥४९॥सुमालीचमहाभागोवि

DR BHAU DAJI MEMORIAL

ष्णुलोकेषुशाश्वतं॥स्थित्वाभूमिंपुनः प्राप्यभूयोविप्रत्वमागतः॥५०॥अतिस्तव्यकुलेजातोगुणवान्वे
दपारगः॥सर्वसंपन्नायुक्तोहरिपूजापरायणः॥५१॥यज्ञं श्च अकरोत्तत्र मोक्षार्थंविष्णुतत्परः॥स
प्रस्तत्रतदानानिप्रेषेदेजान्हवीतटे॥५२॥धर्मोश्वकृतवांस्तथा॥५३॥हरिपूजापरोनित्यंहरिपूजा
परायणः॥व्याहरहरिनामानिप्रेषेदेजांन्हवीतदा॥५४॥तत्रत्रस्थितश्चमंगायोदृष्ट्वाविश्वेश्वरं
प्रभुं॥अवापपरमंस्थानं योगिनामपिदुर्लभं॥५५॥उपलेपनमाहात्म्यं कथितंवामुनीश्वराः॥तस्मा
त्सर्वप्रयत्नेन एजयध्वंजनार्दनं॥५६॥नतेषांचरजोविप्रायेचर्चयंतिजनार्दनं॥तस्मात्सर्वप्रय
त्नेन संपूज्योजगतांपतिः॥५७॥कदाचिदपियोविष्णोसकृत्पूजांप्रकुर्वतां॥नतस्यभवेभंग
स्तुकदाचिदपिजायते॥५८॥हरिपूजापराणांचहरिबुध्याप्रपूजयेत्॥तमाहुर्केतिविप्रेंद्रा
ब्रह्मविष्णुमहेश्वराः॥५९॥हरिभक्तिपराणांतु संगिनोसंगमात्रतः॥मुच्यंतेसर्वपापेभ्योमहा
पापकराअपि॥६०॥हरिपूजापरायेचहरिनामपरास्तथा॥॥ शुश्रूषानिरतायांनिपा
पिनोपिपरांगतिं॥६१॥॥॥॥॥इतिश्रीबृहन्नारदीयेपुराणेचतुस्त्रिंशोध्यायः॥३७॥सूतउवा

भूयः शृणुष्वविप्रेंद्रा माहात्म्यंकमलापतेः॥ कस्यनो जायते प्रीतिश्रोतुंहरिकथांकमुने॥१॥नराणां॥ नार॥
विषयाधीनांममत्वागतचेतसां॥एकमेवहरेर्नाम सर्वपापप्रनाशनं॥२॥सकृद्यानप्रमेयस्तुविष्णु
र्कर्महारिणी॥सर्वोपमंतंजानीयाकदाचिदपिनाऽर्चयेत्॥३॥हरिपूजाविहीनंतुयस्मरेत्तेद्वि
जोत्तमाः॥ज्ञानज्ञानसदृशंविद्याकदाचिदपिनार्चयेत्॥४॥हरिपूजाविहीनाश्चवेदाविद्वेषिणस्त
था॥द्विजगोदूषणाश्चापराक्षसाः परिकीर्तिताः॥५॥योवाकोवापिविप्रेंद्रा विप्रद्वेषपरायणः॥यत्पर्चयतिगोविंदं साहूजाविफलाप्तवेत्॥६॥अन्यश्रेयोविघातार्थंयेर्चयंतिजनार्दनं॥सा
हूजासुमहाभागाहूजकानांशुहेतवे॥७॥हरिपूजापरोयस्तुयदिपापंकरोतिवै॥तत्सर्वंविष्णु
दूषणंप्राकुरुस्तत्वार्थकोविदः॥८॥येविष्णुनिरताःशांताःसाधवोऽनुग्रहत्तराः॥सर्वभूतदया
युक्ताः विष्णुरूपाःप्रकीर्तिताः॥९॥कोटिजन्मार्जितैःपुण्यैर्यदिभक्तिःप्रजायते॥दृढबुद्धिमतां
विष्णोपापबुद्धिःकथंभवेत्॥१०॥जन्मकोट्यार्जितंपापंहरिपूजारतात्मनां॥क्षीणंयातिक्ष ॥१२६॥
णादेवतेषांपातकधीःकथं॥११॥विष्णुभक्तिविहीनायेचांडालाःपरिकीर्तिताः॥चांडाला

अपिवैम्लेच्छाहरिभक्तिपरायणाः॥१२॥नराणांविषयाधीनांसर्वदुःखानिवासनां॥हरिसेवेति
विख्याताभक्तिमुक्तिप्रदायिनी॥१३॥जन्मजन्महयाभ्यासाद्ज्ञानादपियोनरः॥विष्णोरुपासनं
कुर्यान्मोक्षार्थंसुखमश्नुते॥१४॥हरिपादोदकंयस्तुकरपात्रेनुधारयेत्॥सस्नातःसर्वतीर्थेषुविष्णो
रप्रियनरस्तथा॥१५॥अकालमृत्युशमनंसर्वव्याधिविनाशनं सर्वदुःखोपशमनंहरिपादोदकं मुखे॥१६॥
नारायणपरंधाम ज्योतिषांज्योतिरुत्तमं॥येप्रपन्नामहात्मानस्तेषांमुक्तिर्हिशाश्वती॥१७॥सूतउवाच
व्यासासुराक्षयेकल्पेकालिकोनामराक्षसः॥परदारपरद्रव्यहरणेसततोद्यतः॥१८॥परनिंदापरो
नित्यंजंतुपीडारतस्तथाहलवान्ब्रह्मणांश्चवशंतत्रोपसहस्रशः॥१९॥देवस्वहरणेनित्यंपरस्वह
रणेतथाऽयुक्तःसर्वदाविप्राकोनशानाधीश्वराः॥२०॥तेनपापान्यनेकानिकृतानिसुमहांति
चा॥तेषांशक्यंतेवक्तुंसंख्यावत्सरकोटिभिः॥२१॥सकदाचिन्महापापीजनानामंतकोश्रुतः॥
सोवीरंनामनगरंसर्वैश्वर्यसमन्वितं॥२२॥योषिद्भिर्भूषिताभिश्चसरोभिर्विमलोदकैः॥अलंकृ
तंविपणिभिः ययौदेवपुरोपमं॥२३॥तस्योपवनमध्यस्थंरम्यंकेशवमंदिरं॥कादंतहेमकलशं
दृष्ट्वाव्याधोमुदंययौ॥२४॥हरामण्यसुवर्णानिबहूनीतिविश्रुतः॥जगामविष्णुभवनंकेशा

सोचंचलोलुपः॥२५॥तत्रापश्यद्द्विजवरंतृणीतंतत्प्रार्थकोविदं॥परिचर्यापरंविष्णोरभंगतपसा
न्वितं॥२६॥एकाकिनंदयालुंतंनिस्पृहंध्यानलोलुपं दृष्ट्वासोचमुनिंमेनेचोरंस्वर्गस्यहारकं॥२७॥ धनारथ।
दिवस्यद्रव्यजातंतुसमादातुमुपस्थितं॥उत्तंकंहंतुमारेभेविवृत्तासिर्मदोधतः॥२८॥दैवेना क्रम्य
तद्वक्षः कंठंनिगृह्यपाणिना॥एवंहत्तमतिंतंतुउत्तंकःप्रेक्ष्यमब्रवीत्॥२९॥उत्तंकउवाचभोभोब्रा
ह्मणवृथामांत्वंहनिष्यसिनिरागसं॥मयाकिमपराधंतेकृतंतद्वदतुध्रुवं॥३०॥क्वचापराधिनोलो
कःक्षमींकुर्वंतियत्नतः॥नहिंसंतिवृथासोम्यसज्जनाअपिपापिनं॥३१॥विरोधिष्वपिमूर्खेषुनि
रीक्ष्यावस्थितागुणान्॥विरोधंनाधिगच्छंतिसज्जनाःशांतचेतसः॥३२॥बहुशोबाध्यमानोयो
नरःक्षमयान्वितः॥तमुत्तमंनरंप्राहुःविष्णोःप्रियतरंतथा॥३३॥सुजनोनयातिवैरंपरहितनिरतो
ध्वंसनाशकालेपि॥छेदेपिचंदनतरुर्वासयतिमुखंकुठारस्य॥३४॥अहोविधिर्बलीयान्वै
बाधंतेबहुधाजनान्॥सर्वसंगविहीनोपिबाध्यतेनदुरात्मना॥३५॥अहोनिष्कारणंलोकेबा ॥१२७॥
धंतेपिशुनाजनाः॥तत्रापिसाधुजानंतेनसमानेकबंधनाः॥३६॥मगमीनसज्जनानांतृ

णजलसंतोषविहितवृत्तीनां॥शुष्यद्धरापरशुनानिष्कारणवैरिणोजगति॥३७॥हा
हाबलवतीमायामोहयत्यखिलंजगत्॥पुत्रमित्रकलत्रार्थंसोर्धदुःखेनयोजितः॥३८॥पर
द्रव्यापहरणकलत्रंपोषितंतुयैः॥अंतेतत्सर्वमुत्सृज्यएकएवप्रयातिवै॥३९॥मममातामम्मपिता
ममभार्यामममात्मजः॥ममेदमिजंतूनांममतावाधतेवृथा॥४०॥यावदार्जयतेद्रव्यंतावदेवाहबांध
वाः॥धर्माधर्मौसहैवास्तामिहामुत्रनचापरः॥४१॥धर्माधर्मार्जितंयैर्जैःपोषितंस्वेनस्वेनरः॥
कृतमग्निमुखेहुत्वाहुताशंभुंजतेहितं॥४२॥गच्छंतंपरलोकंचनरंतिष्ठंतुतिष्ठतः॥धर्माधर्मौ
नचधनंनपुत्रान्नचबांधवाः॥४३॥कासमृद्धिसमायातिनराणांपापकर्मणां॥वृथायंबध्यतेलो
कोधनादीनांसदार्जने॥४४॥यद्वावित्तद्रवस्यैवनैतज्ज्ञानंत्यबुध्यः॥पश्यैदंनैकनवस्थामि
यदुक्तंयैथकोविभिः॥४५॥भवितव्यंभवत्येवतच्चलोकोनबुध्यते॥यद्भवंतद्भवत्येवयदभावंच
नाभवेत्॥४६॥इतिनिश्चित्यबुधोनोनचिंताबाधतेक्वचित्॥दैवाधीनमिदंसर्वंजगत्स्थावर
जंगमं॥४७॥तस्माज्जन्मवतांमृत्युर्देवोजानातिनापरः॥यत्रकुत्रस्थितस्यापिनरस्याकुल
चेतसः॥४८॥महापापानिकृत्वापिपरांस्तुष्यतियत्नतः॥आर्जितंतुधनंसर्वंभुंजतेबांधवा

दयश्च॥४४॥स्वयमेकाकिनोमूढास्तत्पापफलमश्नुते॥सूतउवाचइतिब्रुवाणंतमुनिंविमुच्यभयवि
ह्वलःपक्वकलिकःप्रांजलिःप्राहक्षमस्वेतिपुनःपुनः॥तत्संवादप्रभावेनहरिसंन्निधिमात्र
तः॥४६॥सतुपापीलुब्धकश्चअनुतापीदमब्रवीत्॥कलिकउवाचमयाकृतानिपापानिमहांतिसुबहू
न्यपि॥४७॥तानिसर्वाणिनष्टानिविप्रेंद्रतवदर्शनात्॥अहोहंपापधीर्नित्यंमहापापैसमाचर
नात्॥४८॥कथंमेनिष्कृतिर्भूयात्कथंयामिशरणंविभो॥पूर्वजन्मार्जितैःपापैलुब्धकत्वमवाप्तवा
नास्मि॥४९॥अत्रापिपापजालानिकृत्वाकोगतिमाप्नुयां॥अहोममेयुःक्षमेवैतिशीघ्रंपापान्यनेक
निसमार्जितानिप्रसिक्रियानैवकृतंमयैषागतिश्चकास्यान्मम जन्मकिंवा॥५०॥अहोविधेः
पापशतार्जकस्यकिंसृष्टवान्भारकरंचमर्त्यंकुर्वंतुतत्पापफलंचभोक्ष्येकियत्तुतन्नाप्यहमु
ग्रकर्मा॥५१॥सूतउवाचएवंनिंदंचात्मानमात्मनालुब्धकस्तथाऽतस्तापातिसंतप्तः
सद्यःपंचत्वमागतः॥५२॥उत्तंकःपंसितंवीक्ष्यलुब्धकंनेदयापरः॥विष्णुपादोदकेनैवअभ्य
षिंचद्यानेधिराः॥५३॥हरिपादोदकस्पर्शाल्लुब्धकोवीतकल्मषः॥दिव्यंविमानमास्थ्य

॥नार०॥
॥१२८॥

मुनिमेनमथाब्रवीत्॥५४॥दिव्यदेहधरउवाच॥उत्तंकमुनिशार्दूलगुरुस्त्वंममसुव्रत॥विमुक्तःस्त्व
त्प्रसादेनमहापातकबंधनात्॥५५॥ज्ञानंस्त्वदुपदेशान्मेसंतापोमुनिपुंगव॥तेनमेपापजाला
निविनष्टानिमहामते॥५६॥हरिपादोदकंयस्मान्मयित्वंसिक्तवानसिप्रापितोऽसित्वयातस्मात्त्वद्वि
ष्णोःपरमंपदं॥५७॥त्वयाहंकृतकृत्योऽस्मिगुरुस्त्वंममसुव्रतःतस्मान्नतोऽस्मिमेविद्धिनंतंऋष
मस्त्वमे॥५८॥सूतउवाचइत्युक्तोदेवदूतेनमुनिश्रेष्ठमवाकिरन्॥प्रदक्षिणत्रयंकृत्वानमस्कारं
चकारसः॥५९॥शिरसांजलिमाधायस्तोषीत्सकमलापतिं॥नमस्तुतेमहाविष्णुर्दत्त्वावरमु
त्तमं॥६०॥वरदानेनोत्तंकोविप्रेंद्रेपरमंपदं॥६१॥॥॥॥इतिश्रीबृहन्नारदीयेपुराणेपंचत्रिं
शोध्यायः॥३५॥ऋषयऊचुः॥कंस्तस्तोत्रंमहाभागकथंतुष्टोजनार्दनः॥उत्तंकःपुण्यपुरुषः
कीदृशंलब्धवान्पदं॥१॥सूतउवाच॥उत्तंकोनामविप्रर्षिःहरिंजजापसायान्हेदृष्ट्वातु
कोनामविप्रर्षिर्हरिध्यानपरायणः

ष्टावभक्तिलभ्यः॥२॥नमामिनारायणमासुदेवंजगन्निवासंजगदेकहेतुं॥चक्रासिशार्ङ्गेषु ॥नार०॥
यघृज्ञहीतंस्मृतार्तिविच्छेदकरंप्रसन्नं॥३॥यन्नाभिभावप्रसवोविधाताजजस्रमुल्लोकसमुच्चयं
यश्॥यक्रोधजोरुद्रइतीरयंतीतमादिदेवंप्रणतोस्मिविश्वं॥४॥यन्नाभिपद्मादजनाभजाक्षंविचिंत्य
वीर्यंनिरिच्छैकहेतुं॥वेदांतवेद्यंपुरुषंपुराणंतेजोनिधिंविष्णुपदंप्रपद्ये॥५॥अनादिमंतःसर्वग
तोच्युताख्योदिनात्मकोगानविदांवरिष्ठः॥नित्यंप्रपन्नार्तिहरःपरात्मादयांबुधिर्मेवरदस्वरूपः॥६॥
यस्थूलसूक्ष्मादिविशेषभेदैर्जगत्सविस्तारितमेतदीशं॥तमेवसर्वंमनंतसारमतःपरंना
स्तिपरात्परात्मन्॥७॥अगोचरंयत्तवरूपसूक्ष्मंप्राणादिहीनंगुणजातिहीनं॥निरंजनंनिर्मलम
प्रमेयंपश्यंतिसंतःपरमात्मसंज्ञं॥८॥एकंनहैनैववि भूषणानिजातानिभिन्नत्वमुपादि
धर्भेदतानैवविश्वेश्वरएकएवप्रदृश्यतेभिन्नहरार्पितास्॥९॥यन्माययामोहितमा ॥१२९॥
नसाद्यपश्यंतिनात्मानमप्रिप्रपद्येपंन्नं॥त्वदेवमायाविगतास्तदैवपश्यंतिसर्वात्मकमात्मा॥

रूपं॥१०॥निर्गुणंपरमानंदमप्रमेयमजरंध्रुवंपरंज्योतिरनोपम्यंविष्णुसंज्ञंनमाम्यहं॥११॥समस्तमेत
दुद्भूतंयतोयत्रप्रतिष्ठितं यत्रश्चैतन्यमायातियद्रूपंतस्यैवनमः॥१२॥अप्रमेयमनाधारमनाधारंगत
मपिपरमानंदचिन्मात्रंवासुदेवंनमाम्यहं॥१३॥हंतुहानिलयंदेवंयोगिभिःपरिशोभितं॥योगानाम
दिभूतंचनमामिप्रणवात्मिकं॥१४॥नादात्मकंनादबीजंप्रयातःप्रणवात्मकं॥संभवंसच्चिदानंदं
वंदेतंनिगमचक्रिणं॥१५॥भास्करंजगतःसाक्षिभवाब्धनसंगोचरं॥निरंजनंचनित्यास्यंविश्व
रूपंनतोस्म्यहं॥१६॥इंद्रियाणिमनोबुधिसत्वंतेजोबलंधृतिः॥वासुदेवात्मकंप्राहुःक्षेत्रंक्षेत्रज्ञमेव
च॥१७॥वरंवरेण्यंवरदंपुराणंसनातनंसर्वगतंप्रसन्नं॥नतोस्मिभूयोपिनतोस्मिभूयोनतोस्मि
भूयःप्रणतोस्मिभूयः॥१८॥यस्यादतोयंभवरोगवैद्यंयस्यादपास्तंविमलंचशुद्धः॥यस्यादवु
स्तमनिवारणीयंतमप्रमेयंपुरुषंनमामि॥१९॥सदूपंतमसदूपंसदसदूपमव्ययं॥तद्विलक्षणंश्रे
ष्ठंतमश्रेयतरंभजे॥२०॥निरंजनंनिराकारंपूर्णमाकाशमध्यगं॥परंचविद्याविद्याभ्यांद्

देवुजानिवासिनं॥२१॥सुप्रकाशमनिर्देश्यं महतोमहत्तरं॥अणोरणीयांसमजं सर्वोपाधिविवर्जि
तं॥२२॥योन्नित्यंपरमानंदपूर्णश्चैवसनातनः॥विष्णुसंगंजगद्धामतमस्मिशरणंगतः॥२३॥यंभजं
तिक्रियानिष्ठायंपश्यंत्ययोगिनः॥पूज्यास्पूज्यतरंशांतंतमस्मिशरणंगतः॥२४॥यंनपश्यंति
विद्वांसोयत्रतद्व्याप्यतिष्ठति॥सर्वस्मादधिकंनित्यंतमस्मिशरणंगतः॥२५॥अंतःकरणसंगातुजीवाहं
बुध्यतेचयः॥अविद्याकार्यरहितंपरमात्मेतिगीयते॥२६॥सर्वात्मकंसर्वहेतुंसर्वकर्मफलप्रदं
वरंवरेण्यमजरंप्रणतोस्मिपरात्परं॥२७॥सर्वज्ञकंसर्वगतंमहांतंवेदात्मकंवेदविदोवरिष्ठांतंवा
ऽग्र्यमनोचिंत्यमनंतशक्तिंइनेकवर्यंपुरुषंभजामि॥२८॥यंब्रह्मरुद्राग्निकालासुरपाणिवाहासामायणा
श्चेवपुरंदराद्याः॥यःपातिलोकेपरिपूर्णभावस्तमप्रमेयंशरणंप्रपद्ये॥२९॥सहस्रशीर्षंचसह
स्रपादंसहस्रबाहुंचसहस्रनेत्रं॥सहस्रागंपरिपूर्णमाद्यंनतोस्म्यभीष्टप्रदमुग्रवीर्यं॥३०॥
कालात्मकंकालविभागहेतुंगुणत्रयातीतमजंगुणेशं॥गुणप्रियंकामदमप्तसंगतं

तंद्विपंतंद्विभुजंवितृष्णं३१निरीहमग्र्यंमनसोप्यगम्यंमनोमयंचोन मयस्वरूपं॥नवाङ्मयं प्रा
णमयंभजामिविज्ञानभेदप्रतिपन्नकर्त्यं३२नयस्यरूपंनवयप्रमाणोनयस्यकर्मापिनयस्त्रमा
र्गं॥जानंतिदेवाःकमठोद्भवाद्याःस्तोष्यामितेकथमात्मरूपं३३संसारसिंधौपतितंशरण्यंमो
हाकुलंकामशतैर्नबाध्यं॥विज्ञानमेवप्रभिदात्मबुद्धिंत्रायस्वतुभ्यंसततंनमोस्तु३४ज्ञानेन
हीनंचदयाविहीनंतुभ्यंपरद्रव्यपरायणंमां॥ममत्वपाशैश्शतबंधितंचत्रायस्वविष्णोसततंनमो
स्तु३५अकीर्तिभाजंपिशुनैकनघ्नंसदासुचिंपापरतंप्रसह्य॥दयानिधेत्राहिदयाकुलंमांपु
नःपुनस्त्वांशरणंप्रपद्ये३६सूतउवाच इतिप्रसादितस्तेनदयालुःकमलापतिः॥प्रत्यक्षतामा
गात्तस्यभगवांस्तेजसांपतिः३७अतसीपुष्पसंकाशंपुंडरीकनिभेक्षणं॥किरीटिनंकुंडलिनंहा
रकेयूरभूषणं३८श्रीवत्सकौस्तुभधरंहेमयज्ञोपवीतिनं॥नासाग्रन्यस्तमुक्ताभंवर्धमानतरु
प्रियं३९मौलौवरधरंदेवंवनमालाविभूषितं॥तुलसीकोमलैपत्रैरर्चितांघ्रिंमहीपतिं४०॥
रत्नकिंकिणिनूपुरैरायैश्चशोभितंगरुडध्वजं॥दृष्ट्वानप्राविविप्रेंद्रादंडवत्क्षितिमंडले४१नय

नकमलयाविष्णोस्तंकोहर्षवारिभिः॥अरोमरक्षरक्षेति व्याजहारातिधीस्तथा॥४२॥तमुत्थाप्यम
हाविष्णुरालिलिंगोदयापरः॥वरंवरयवत्सेति प्रोवाचमुनिपुंगवं॥४३॥भगवानुवाच॥असाध्यंवा
स्तिकिंचिन्नप्रसन्नमयिसत्तम॥वरंवरयतस्मात्वंमाविलंबंकृथामुने॥४४॥सूतउवाच॥इतीरितंस
मकर्ण्यउत्तंकश्चक्रपाणिना॥पुनःप्रणम्यतंप्राहदेवदेवंजनार्दनं॥४५॥उत्तंकउवाच॥किमोप्राहय
त्स्वामिन्किमन्यैर्देवमेवरैः॥त्वयिभक्तिर्दृढाप्रस्तुजन्मजन्मांतरेष्वपि॥४६॥कीटेषुपक्षि
षुमृगेषुपुरारिसर्पेषुरक्षःपिशाचमनुजेषुपियत्रतत्र॥जातस्यमेभवतुकेशवत्वत्प्रसादात्व
य्यवभक्तिरचलाव्यभिचारिणीच॥४७॥सूतउवाच॥एवंमस्तिसिदेवेशोरवप्रोतेनतेस्मृतः॥
दिव्यानंददोतस्मैयोगिनांमपिदुर्लभं॥४८॥पुनस्तुवंतिविप्रेंद्रादेवदेवंजनार्दनं॥इदंमाहसिरमु
खोहस्तंशिरसिनिक्षिपन्॥४९॥श्रीभगवानुवाच॥आराधयक्रियायोगंमांसदाविप्रसत्तमं॥स्मरना
रायणस्थानंब्रह्मलोकेभविष्यसि॥५०॥त्वयाकृतमिदंस्तोत्रंयःपठेत्सततंनरः॥सर्वान्कामानवा
प्नोतिनृनोमोक्षमवाप्नुयात्॥५१॥सूतउवाच॥इत्युक्त्वामाधवोदेवस्तत्रैवांतरधीयत॥नरनारय
णस्थानमुत्तंकोपिसमाययौ॥५२॥तस्माद्भक्तिःसदाकार्यादेवदेवजनार्दने॥हरिर्भक्तैःपराप्राप्यः

॥नार०॥
॥१३१॥

सर्वकामफलप्रदा॥५३॥पूजयध्वंमहादेवंविप्रेंद्रागस्त्यवत्सलं॥पूजितोनमितोवापिसंस्मृतोवापिमोद
तः॥५४॥तस्मान्नारायणोदेवोह्यनंतमपराजितः॥इहामुत्रफलेप्सुःपूजयेद्भक्तिसंयुतः॥५५॥यःपठे
दिदमध्यायंश्रृणुयाद्वासमाहितः॥सर्वपापविनिर्मुक्तःप्रयातिपरमंपदं॥५६॥इतिश्रीबृहन्नारदीये
पुराणेषड्विंशोध्यायः॥सूतउवाच॥भूयःश्रृणुध्वंविप्रेंद्रामहात्म्यंपरमेष्ठिनः॥सर्वपापहरंपुण्यं
नारदेनप्रभाषितं॥१॥अहोहरिकथालोकेपापघ्नीपुण्यदायिनी॥श्रृण्वतांवदतांचैवतद्भक्तानांविशेषतः॥२॥हरिभक्ति
रसस्वादमुदितायनरोत्तमाः॥नमस्कुर्महेनेषांसंगीमुक्तिभाग्यतः॥३॥हरिभक्तिपरायेतहरिनामप
रायणाः॥दुर्वृत्तावासुवृत्तोवातेषांनित्यंनमोनमः॥४॥संसारसागरंतर्तुयदिछेन्मुनिसत्तमाः॥सभजेत्स
रमात्मानंभक्तानांपापहारिणं॥५॥दृष्टःस्मृतःपूजितोवाध्यातोवानमितोपिवा॥समुद्धरत्तिगोविंद
दुस्तरद्भवसागरात्॥६॥स्वपन्भुंजंस्तिष्ठन्नुत्तिष्ठंश्चस्तुवंस्तथा॥वदंस्तियोहरेर्नामतेषांनित्यंनमो
नमः॥७॥अहोभाग्यमहोभाग्यंविष्णुभक्तिरतात्मनां॥यत्समद्रक्तिकराश्चैवयोगिनापिदुर्लभाः॥८॥
असीत्पुराक्षितीपालःसोमवंशसमुद्भवः॥यज्वजरतिख्यातोनारायणपरायणः॥९॥द्वीपदानप
दानपरश्चैवसर्वभूतदयापरः॥सकदाचिन्महीपालःक्षीरवातीरमनारमं॥१०॥विचित्रदर्शनोपवनं

तवान्हरिर्मंदिरं सोपलत्रा भवदासासदासंमार्जनरतश्च ॥१॥ हीपदानेचविप्रेंद्रा विशेषेणाहरिप्रियः हरिना
मपरोनित्यंहरिसंस्तुतमानसः ॥२॥ हरिप्रणामनिरतोहरिभक्तिजनप्रियः ॥३॥ वीतिहोत्रस्तिरश्चीनो अ
सीतस्यपुरोहितः ॥४॥ यतध्वजस्यचरितंदृष्ट्वाविस्मयमागतः ॥५॥ कदाचिदुपविष्टंतंज्ञानेविष्णुसरं ॥६॥
अपृच्छद्वीतिहोत्रस्तंवेदवेदांगपारगः ॥७॥ वीतिहोत्रउवाचराजन्परमधर्मज्ञहरिभक्तिपरायणः ॥८॥ वि
ष्णुभक्तिमतांश्रेष्ठ शिवस्यमुनिसत्तम संमार्जनपरोनित्यंदीपनदानपरस्तथा ॥९॥ तन्मेवद
महाभागत्वयाकिंचिन्नितंफलं संमार्जनेनवर्त्तीनांदीपनसंमार्जनेनतथा ॥१०॥ त्वंमुक्तोसिमहाभागस
दासंमार्जनेरतः कर्मधर्मान्यानिसंत्येववर्त्तंतेशिवकर्मणि ॥११॥ तथापित्वंमहाभागचरितैः
सततोद्यतः ॥१२॥ सर्वस्मान्नामहत्पुण्यंनतेषुविदितंत्वया ॥१३॥ तद्वहंमेत्वंगुरुंप्रीतिर्मेभवत
वास्तिचेत्तस्तउवाचपुरोधसंवमुक्तस्तुप्राहसनराजसत्तम ॥१४॥ विनयाचनतोभूत्वाप्रो
वाचेदंकृतांजलिः ॥१५॥ यज्ञंचजपंवाचस्तुष्टंविप्रंशार्दूलमेवचरितंपुरा ॥ ॥ज्ञानिस्मरत्वा ॥१३२॥
ज्ञानाग्नियनृणांविस्मयप्रदं ॥१६॥ आसीत्पुराकृतयुगेब्रह्मस्थानेत्रिवोत्तरेव्यवसोना

माविप्रेंद्रोवेदवेदांगपारगः ॥१७॥ अयंभ्रयाचकश्चैवसदैवग्रामयाचकः पिशुनोनिर्गुणश्चैव
आपण्यः ॥१८॥ नोचविक्रयी ॥१९॥ निषिद्धकर्माचरणः परित्यक्तः सबंधुभिः दरिद्रोदुःखितश्चै
व व्याधितोनित्यवेतनः ॥२०॥ सकदाचिद्धनंतृष्णांपर्यटन्द्विजः प्रमारनर्मदातीरे
कासश्वासप्रपीडितः ॥२१॥ तस्मिंनास्तेतस्यभार्यानाम्नाबंधुमतीतदा कामचारस्तदास्यै
निंदकःपिशुनः सतथा ॥२२॥ तस्माज्जातोस्मिचांडालोचंडकेतुरितिस्मृतः महापापरतोनित्यं
परित्यक्तस्यबंधुभिः ॥२३॥ परदारपरद्रव्यो लोलुपोजंतुहिंसकः गोवध्रविप्रबध्वोर्निहता
मृगपक्षिणः ॥२४॥ मरुत्तुल्यसुवर्णाणिबहून्यपहृतानिच मद्यपानरतोनित्यं निंदकःपि
शुनस्तथा ॥२५॥ एवंपापरतोनित्यं बहुशोमार्गरोधकृत् पशुपक्षिमृगादीनांजंतूनामे
तकोपमः ॥२६॥ कदाचित्कामसंतप्तो भुज्यमानपरस्त्रियं स्वयंपूजादिभिर्विप्रोमीदंप्रा
प्तवान्दिने ॥२७॥ तत्रचासोपभोगार्थंरात्रितुंतेनकामिना वस्वप्नांतेस्तेब्रह्मन्क्रिया
न्यायैः समार्जितः ॥२८॥ यावंतःपांशुकणिकास्तेनसंमार्जितास्तदा तावज्जन्मकृतंपा

पंतदेवक्षमयागतं ३३ प्रसादीपःस्थापितस्तत्रवरणार्थंतद्विजोत्तम तेनापिदुष्कृतंसर्वंनि
शेषंक्षयमागतं ३४ एवंस्थितंविष्णुगृहेआगताःपुरपालकाः चौरस्तथैमांतत्रैवहल
वंतोद्विजोत्तमाः ३५ दिव्यंविमानमारुह्यसर्वभोगसमन्वितं सघण्टवतयासार्धंविष्णुलोक
मुपागतः ३६ तत्रस्थित्वाब्रह्मकल्पंशतंसाग्रंद्विजोत्तमा ततश्चब्रह्मणासार्धंतत्रचत्काले
चसंस्थितं ३७ ततस्तुभागवद्भूमौदेवयोनौनवेक्रमात् तेनपुण्यप्रभावेनयद्भोगेश
संभवः ३८ तेनैवचमयाप्राप्तंसम्यग्राज्यमकंटकं ब्रह्मस्वंचापहृत्याचभोगार्थमेवंश्रेयःसमाप्त
वान् ३९ मत्स्याकूतवतोंधुंसोकिंभेवेदितिवेत्थिना तस्मात्संमार्जनेनित्यंदीपदानेचसत्त
म ४० यतिष्येपरयाभक्त्यासहेज्यातिस्मरोयतः यःपूजयेजगन्नाथंमेकाकीविगतस्पृहः
४१ सर्वपापविनिर्मुक्तःप्रयातिपरमंपदं हेलयेनापियत्कर्मकृतेमांश्रियमागत
४२ मुक्तिमद्भिःप्रशांतैश्चकिंपुनःसम्यगर्चनात् सूतउवाचइतिभूपवचश्रुत्वावीतिहो
द्विजोत्तमः अत्यंतसंतुष्टिमापन्नोहरिरुवाचपरोभवत् ४४ तस्माद्वृणुष्वविप्रेंद्रोदे

॥नार०॥
॥१३२॥

वोनारायणोव्ययः ज्ञानतोज्ञानतोवापिपूजकानांविमुक्तिदः ४५ अनित्यान्शरीराणिविभ
वोनैवशाश्वतः नित्यःसन्नितोनित्यंकर्त्तव्योधर्मसंग्रहः ४६ अनित्याबोधवाःसर्वेसंपद
स्तेनसंपेचंचलाःशरीरिणांध्रुवंमृत्युस्तस्मात्पूजस्वकेशवं ४७ हेजनाःकिंवृथासर्वंकरिष्य
थमदोषतः कायःसन्निहितापापोधनादीनांकिमुच्यते ४८ जन्मकोटिसहस्रेषुपुण्यैर्यैः
समुपार्जितं तेषांभक्तिर्भवेद्ध्रुवादेवदेवेजनार्दने ४९ सुलभंजह्नवीस्नानंतथाचात्रैव
पूजनं सुलभाःसर्वयज्ञाश्चविष्णुभक्तिसुदुर्लभा ५० दुर्लभातुलसीशोवादुर्लभासंग
तिःसतां दुर्लभाहरिभक्तिश्चसंसारार्णवतारिणी ५१ सर्वस्तुत्यात्वापिसुलभायस्यक
स्यचित्तस्संगस्तुलसीशोवाहरिभक्तिश्चदुर्लभा ५२ दुर्लभंचापिमानुष्यंभवत्यानाशमे
ष्यथा सर्वाधारंसर्वयोनिं सर्वेतीर्थप्रियंविभुं ५३ अर्चयध्वंमहाभानंश्रेयश्रेयोवदाप्ति
वः तर्तुयदृच्छयजनादुस्तरंभवसागरात् ५४ हरिभक्तिविहीनैर्नयजनीयःसुरर्षभः
यजध्वमयुगोविंदंकिलंविकिंकरिष्यथा ५५ आसन्नमेवमरणंकृतांतश्चापिदृश्यते॥

नरायणोजगन्नाथिसर्वकारणकारणः॥४॥समर्चयत्वेविप्रेंद्रायदिमुक्तिमभीप्सवः॥सर्वाधारेसर्व
योनिंसर्वेतर्यामिणंविभुं॥५॥येप्रपन्नामहात्मानःतेकृतार्थानसंशयः॥तेबांधवास्तेएज्या
श्चनमस्कार्याविशेषतः॥६॥येचर्चयंतिमहाविष्णुंप्रणतार्तिप्रणाशनंयेविष्णुभक्तिनिरताः
निष्कामाःश्रद्धयान्विताः॥७॥त्रिःसप्तकुलसंयुक्ताःतेयांतिहरिमंदिरे॥विष्णुभक्तायये
दद्यान्निष्कामायमहात्मने॥९०॥पानीयंवाफलंवापिसद्यक्षगवान्हरिः॥विष्णुप्रसादणो
चभुश्रूषांकुर्वतेचये॥९१॥प्रयांतिविष्णुसदनंत्रिःसप्तपुरुषान्विताः॥येयजंतिसदाभक्त्या
हरिंवाहरमेववा॥९२॥तएवसर्वकरणोफलंतिविबुधर्षभाः॥देवएज्यापरोयस्यगेहेवसतिस
र्वदा॥९३॥तत्रैवसर्ववेदाश्चहरिश्चैवश्रियान्वितः॥एज्यमानाचतुलसीयस्यशिरसितिष्ठति
॥९४॥तस्यसर्वाणिश्रेयांसिसिध्यत्यहरहोद्विजाः॥सालग्रामशिलारूपीयत्रतिष्ठतिकेशवः॥९५॥
नबाधतेयमस्तस्यनस्तेवेतालकादयः॥शालग्रामशिलायत्रतत्तीर्थंचतपोवनं॥९६॥यत्रसमः
सन्निहितस्तत्रभगवान्मधुसूदनः॥यद्गेहेनास्तितुलसीशालग्रामशिलार्चनं॥९७॥तत्म

स्मशानसदृशंविद्यात्तद्गृहंभुजगार्जिते॥पुराणन्यायमीमांसाधर्मशास्त्राणिचद्विजाः॥९८॥सांगावेदा
श्चसर्वेचविष्णुरूपंप्रकीर्तिते॥सत्यंकुर्वंतियेविप्राःप्रदक्षणंचतुष्टयं॥९९॥तेषांयांतिपरं
स्थानंसर्वलोकोत्तमोत्तमं॥तत्रैवनारदेनोक्तमितिहासंपुरातनं॥१००॥वदंतंश्रुण्वतांचैवस
र्वपापंहरंद्विजाः॥एवंस्वेतेनरेरर्वैशक्रस्यचबृहस्पतेः॥१॥संवादंतुमहानासीत्तंसर्वंशृणु
तद्विजाः॥एकदासर्वदेवाद्यैःविबुधैःपरिवारितः॥२॥अप्सरोगणसंपूर्णोबृहस्पतिसभा
वृतः॥इंद्रउवा॥बृहस्पतेमहाभागसर्वतत्त्वार्थकोविदः॥३॥अतीतेब्रह्मणःकल्पेसर्गःकीदृ
शविधःस्मृतः॥ईदृक्तुकीदृशःप्रोक्तोविबुधाःकीदृशाःस्मृताः॥४॥तेषांचकीदृशंकर्मयथा
वद्वक्तुमर्हसि॥बृहस्पतिरुवाच॥अहमाद्यःसुतःशक्रःनाहंजानामिकिंचन॥५॥सर्वेषुःक
तकर्माणिअपिवक्तुंनशक्यते॥वर्त्तमानेदिनेचापिविधातुःपरमेष्ठिनः॥६॥मनवःषड
तीताश्चतदूक्तुमपिनक्षमः॥स्वधर्मरतिविख्याताकाश्चिदास्तेपुरंदर॥७॥सर्वेवेतद्विजा

नारि॥

नारि॥

नारि॥

नारि॥

DR. BHAU DAJI MEMORIAL

प्रोक्तः सर्वकामसमन्वितः ॥९८॥ अष्टमेचापि विबुधाः स्वतपाया प्रकीर्तिताः ॥ विष्णुरुज्ञाप्रभा
वेनतेषामिंद्रोबलिस्वयं ॥९९॥ पारावताद्यास्तेदेवाइंद्रश्चाद्भुतउच्यते ॥ सवामनाद्याविबुधाः द
शमः परिकीर्तिताः ॥१००॥ शांतिनामाचतत्रेंद्रः सर्वशोभसमन्वितः ॥ विहंगमाद्योदेवाश्च
तेषामिंद्रोवृषस्मृतः ॥१०१॥ एकादशंतमः प्रोक्तः शृणुष्वदशमस्यया धातुनामाचदेवेंद्रो
हरिताद्यास्तथासुराः ॥१०२॥ अत्रामानादयोदेवास्त्रयोदशतमाः स्मृताः ॥ दिवस्पतिर्महावी
र्यस्तेषामिंद्रः प्रकीर्तितः ॥ चतुर्दशाभ्रुपाद्यादेवाइंद्रः शुचिस्मृतः ॥ एवंतेमनवः प्रोक्ताः
देवाइंद्राश्चतत्त्वतः ॥४॥ एकस्मिन्मनवंतरेदिवसे स्वाधिकारान्प्रभुंजते ॥ लोकेषुसर्वदेवेषु स
ष्टिरेवंविधास्मृता ॥५॥ कर्त्तारावहवस्तत्रसंख्यावेत्तिकोपिनः ॥ प्रयिस्थितेविष्णुलोकेब्रं
ह्मणोबहवोगताः ॥६॥ तेषांसंख्यामहंख्यातुनशक्तोविबुधोत्तमः ॥ स्वर्गलोकमपिप्राप्यया
वत्कालंशृणुष्वमे ॥७॥ चत्वारोमनवोतीतामम श्रीश्वेतविस्तराः ॥ ज्ञातव्यंचमयात्रैवयुग

॥नारद॥ ॥१३९॥

कोटिसमंप्रसंख्यं ॥८॥ ततः परिवाप्निष्यात्रिकर्मक्षयंशृणुष्वमे ॥ मयाकृतंचसुकृतंवदामितवपंडि
त ॥९॥ वदतोश्रृण्वतश्चैवसर्वपापप्रणाशनं ॥ अहमासन्पुराशक्र गृध्रपापावशेषतः ॥१०॥
स्थितश्चास्थिनिषंगेवै अमेध्यामिषभोजनः ॥ एकदाहंविष्णुगृहेप्राकारेसंस्थितः प्रसो ॥११॥
पंक्तितोव्यासशास्त्रेणागच्छन्विष्णुगृहंगतः ॥ मयिकंठगतेप्राणे क्षुब्धकोमांसलोलुपः ॥१२॥
जग्राहमांसवक्त्रेणश्वानंवेगात्समंत्रितः ॥ मयन्मांसमुखेनैवसीतोपिसभक्षकस्तथा ॥१३॥
तः प्रदक्षिणाकारंविष्णोस्तन्मंदिरंप्रभो ॥ तेनैवानुष्ठितंपापं अंतरालेजगन्नाथः ॥१४॥
ममचापिशुनश्चापिदत्तवान्परमंपदं ॥ प्रदक्षिणाकारतयागतस्यापीदृशंफलं ॥१५॥ संप्राप्ते
विबुधश्रेष्ठकेपुनः सम्यगर्चनात्सतः ॥ इत्युक्तोदेवराजस्तु स्वधर्मेणमहामना ॥१६॥ म
नसाप्रतिमापन्नोहरिरेजापरोत्सवे ॥ अथापिनिर्जराः सर्वेशारदेजन्मलिप्सवः ॥१७॥ स
मर्चयंतिविबुधानारायणमनामयं ॥ येयजंतिसदासन्त्यानारायणमनामयं ॥१८॥ तानर्च

र्चयंति सततं ब्रह्मा द्यादेवतागणाः॥ नारायणानुस्मरणो द्यातानां च महात्मनां॥ त्यक्तपरिग्रहाणां ॥नार०॥
तेषां गतिरकामप्रमक्षयाणां यतस्ततः संगलुब्धा अपि मुक्तिभाजः॥१८॥ येमानवाः प्रतिदिनं परिमुक्तसंगा नारायणं गरुडवाहनमर्चयंति॥ तेसर्वपापनिलयैः परिशोचितात्मा विष्णोः पदं शुभतरं प्रतियांतिहृष्टाः॥१९॥ येमानवा विगतरागपरापरज्ञा नारायणं सुरगुरुं सततं स्मरंति ध्यानेन तेन हतकिल्बिषवेदनास्ते मातुः पयोधररसं न पुनः पिबंति॥२०॥ येमानवाइह कथाश्रवणात्तदोषात्तत्पद्मविनिवेशितमानसाश्च॥ तेयांपुनंतिजनतां स्मरणाच्चसंगाज्ज्ञाने समस्तचरितैरुरिरेवपूज्यः॥२१॥ हरिपूजापरायत्रमहीतश्रुतबुध्यः॥ तत्रैवसकलंभद्रं यथानिम्नेजलंद्विजाः॥२२॥ हरिरेवपरंब्रह्महरिरेवपरागतिः॥ हरिरेवपरागतिःहरिरेवपरः पूज्योयतश्चैतन्यकारणः॥२३॥ स्वर्गापवर्गफलदंसदानंदंनिरामयं॥ पूजयध्वंद्विजश्रेष्ठापरंश्रेयोसदैवहि॥२४॥ यत्नेनश्रृणुयाद्वापिपठेद्वापिसमाहितः॥ संप्राप्नोत्य ॥१३७॥

श्वमेधस्यफलंविबुधसत्तमाः॥२५॥ इत्येतद्धरिसमाख्यातंहरिपूजाफलंद्विजाः॥ संक्षेपाद्विस्तराच्चैव किमन्यत्कथयामिवः॥२६॥ इतिश्रीबृहन्नारदीयपुराणेसप्तत्रिंशोध्यायः॥३७॥
ऋषयऊचुः॥ आख्यातंभवतास्माकंसर्वंसततत्वार्थकोविद॥ इदानींश्रोतुमिच्छामोयुगानांस्थितिलक्षणं॥१॥ सूतउवाच॥ साधुसाधुमहाप्राज्ञायूयंलोकोपकारिणः॥ युगधर्मान्प्रवक्ष्यामिसर्वलोकोपकारकान्॥२॥ धर्मविरोधिमायोतिकालेनास्मिंश्चिदुत्तमाः॥ तथापिनाशमायातिधर्मरिवमहीतले॥३॥ कृतंत्रेतादापरंचकलिश्चेतिचतुर्युगं॥ दिव्यैर्द्वादशभिर्वर्षसहस्रैस्तच्चसत्तमाः॥४॥ संध्यासंध्यांशमुक्तानियुगानिसदशानिवै॥ कालतोवेदितव्यानिइत्याहुस्तत्वदर्शिनः॥५॥ आद्यंकृतयुगंप्राहुस्तत्रैवाभिधायिनं॥ तत्रश्रद्धापरंप्राहुःकालमेवंविदुर्बुधाः॥६॥ देवदानवगंधर्वायक्षराक्षसपन्नगाः॥ इमेकृतयुगेयुप्राःसर्वेदेवसमावृताः॥७॥ सर्वेहृष्टाश्चधर्मिष्ठाःन तत्रक्रयविक्रयौदेवानांचविभागश्चनपुंभेगतसंज्ञिते॥८॥ ब्राह्मणाक्षत्रियावैश्याःश्रू

द्रा आचारतत्पराः स्वाश्रमाचारनिरता ज्ञातासूयादंभिकाः ९ सत्यवाक्यरताः सर्वे चतुरा
श्रमपरिणः सदा नारायणपरास्तपोध्यानपरायणाः १० चतुराश्रमयुक्तेन कर्मणा कालयोगिना ॥नारद॥
अकल्पफलसंयोगाः प्रयांति परमां गतिं ११ नारायणः कृतयुगे शुक्लवर्णः सुनिश्चलः जेता
धर्मप्रवक्ष्यामि शृणुध्वं सुसमाहिताः १२ धर्मपादेन तां याति त्रेतायां ब्राह्मणोत्तमाः हरिस्तु
रक्ततां याति किंचिच्छ्यामान्वितं नराः १३ क्रियायोगरताः सर्वे यज्ञकर्मसु निष्ठिताः सत्येर
ता ध्यानपरा दानाश्रपरायणा १४ द्विपादेन गते धर्मे द्वापरे मुनीश्वराः पीतवर्णो हरिर्याति
वेदाश्चापि विभज्यते १५ असत्यनिरताश्चापि यः कश्चिदपि वर्त्तते ब्राह्मणाश्चाश्च वर्णाश्च किं
चिद्रोगादिवर्जिताः १६ केचित्स्वर्गेपि गार्ग्य वि प्रायज्ञान्प्रकुर्वते केचिद्यनादिकामाश्चके
चित्कल्पषेसतसः १७ धर्मो धर्मो समोस्यातो द्वापरे विप्रसत्तमाः अधर्मस्य प्रसंवेण क्षीयते ॥१३८॥
प्रजास्तथा १८ अल्पायुषश्चविष्यंति केचिच्चापि मुनीश्वराः केचित्सुप्तपरान्दृष्ट्वा॥

असत्यावर्त्तते सदा १९ कोचे त्थितिं प्रवक्ष्यामि शृणुध्वं सुसमाहिताः धर्मकलियुगे प्राप्ते त्रिप
दोनः प्रवर्त्तते २० तामसं युगमासाद्य हरिः कृष्णत्वमेवच यः कश्चिदपि धर्मात्मा क्रियायोग
रतोभवेत् २१ नरेधर्मरतेदृष्ट्वा सर्वे सूर्यां प्रवर्त्तते स्वाचाराः प्रणश्यंति ध्यानज्ञोयेदयस्तथा २२
उपद्रवाप्रपाश्यंति व्याधयश्च प्रवर्त्तते अल्पायां निरताः केचिद्देशचारपरायणाः २३ प्रजा
श्चाल्पायुषः सर्वाश्चविष्यंति कलौयुगे ऋषयऊचुः युगधर्माः समाख्याता स्त्रयासंक्षेप
तोमुने कालं विस्तरतोब्रूहि सर्ववेदविदांवर २४ ब्राह्मणाक्षत्रियावैश्याश्चद्रा धर्मपराङ्मु
खाः घोरेकलियुगेप्राप्ते द्विजावेदपराङ्मुखाः २५ व्याजधर्मरताः सर्वे देभत्वारपरायणाः
असूयानिरताः सर्वेवृथाहंकारदूषिताः २६ सर्वैसंक्षिप्यतेसत्यं नरैः पंडितगर्वितैः
लोलुपाश्रीपलघ्नाश्चतथायेतेसिकानराः॥२७॥ अतःस्वल्पायुषेसर्वेप्र
विष्यंतिकलौयुगे॥ अल्पायुस्त्वामनुष्यान विघाग्रहणंद्विजाः॥२८॥ विघाग्र
णाश्रन्यत्वादधर्मोवर्त्ततेपुनः युक्तेप्रप्रजाः सर्वे म्रीयंतेपापतत्पराः २९ ब्राह्मणाघास्त

थावर्णाः संकीर्यंतेपरस्परं कामक्रोधपरा हृदा वधाहंकारपीडिताः ३० वधंचैवाप्सविष्यंतिप
रस्परवधेप्सवः ब्राह्मणाः क्षत्रियावैश्याः सर्वेधर्मपराङ्मुखाः ३१ अल्पार्थाश्चप्सविष्यंति ॥ नार० ॥
तपः सत्यविवर्जिताः उत्तमानीचतांयांतिनीचाश्चोत्तमतांगताः ३२ राजानश्चार्थनिर
ता स्तथा लोभपरायणाः धर्मकंचुकसंवीताधर्मविध्वंसकारिणः ३३ घोरेकलियुगेप्राप्तेसर्व
धर्मसमन्विते क्षेत्रेश्वरथवित्तादयः सत्यराजाप्सविष्यंति ३४ किंकराश्चप्सविष्यंति शूद्राणां
चद्विजातयः धर्मस्त्रीषुनगछंतिपतयोजारलक्षणा ३५ द्विषंतिपितरः पुत्रागुरुंशिष्याद्वि
षंतिहि पथिसंचरमानंतंदृष्टिकृष्णेकृष्णत्वमागते ३६ लोकाभिप्तप्तमनसः सर्वेउन्मार्गशी
लिनः परान्नलोलुपान्नित्यंप्सविष्यंतिद्विजातयः ३७ परस्त्रीनिरताः सर्वेपरद्रव्यपरायणाः
मत्स्यामिषेणजीवंतिदुहंतश्चाप्यजाविकान् घोरेकलियुगेप्राप्ते नराधर्मपरायणाः अस
त्यानिरताः सर्वेउपहासंप्रकुर्वते ३९ सरित्तीरेषुकूपेषुवापयिष्यंतिचौषधीः अन्यमन्य
फलंतेषांप्सविष्यतिकलौयुगे ४० वेश्या लावत्यशीलेषु स्पृहांकुर्वंतिचोषितः धर्मवि ॥ १२९ ॥

प्सविष्यंतिस्त्रियश्चपुरुषेषुच ४१ प्रायशः कृपणानांचबंधूनांचतथाद्विजाः साधूनांविध
वानांचवित्तान्यपहरंतिच ४२ नव्रतानिचरिष्यंतिब्राह्मणावेदनिंदकाः नयष्टंतिनहोष्यंति
हेतुवादैर्विमानिताः ४३ द्विजाः कुर्वंतिदर्भार्थंपितृयज्ञादिकाःक्रियाः अपुत्रेचैवदानानि
कुर्वंतिचयथानराः ४४ स्त्रीरोषाधिनिमित्तेनगोषुप्रीतिंप्रकुर्वते नकुर्वंतिहविप्राणांस्ना
नशौचादिकाःक्रिया ४५ अकालधर्मनिरताः क्रूरयुक्तविशारदाः वेदनिंदापराश्चैवविप्रा
निंदापरास्तथा ४६ नकस्यचिदभिप्रेतविष्णुभक्त्यापरास्तथा देवपूजापरेदृष्ट्वोप
हासंप्रकुर्वते ४७ बध्नंतिचद्विजानेववधार्थंराजकिंकराः ताडयंतिचविप्रेंद्रान्कृष्णे
कृष्णत्वमागते ४८ दानयज्ञजपादीनांविक्रीयंतेफलंद्विजाः कलेप्रथमपादेतुविनिंदंति
हरिंनराः ४९ युगांतेचहरेर्नामनेवकश्चित्स्मरिष्यंति शूद्रास्त्रीसंगनिरताः स्वविधवासंग
लोलुपाः ५० शूद्रान्नभोजनिरताः भविष्यंतिकलौयुगेद्विजाः कुहकेभ्यश्चनैस्तब्येहेतु
वादविशारदैः ५१ पाषंडिनोप्सविष्यंति चतुराश्रमनिंदकाः शूद्राधर्मान्करिष्यंतिकू

टयुक्तिविशारदाः ५२ अशौचरक्तसतयःपरपाकान्नभोगिनः ५३विष्यंतिदुरात्मनःपुत्राःप्रव
ञ्जिकास्तथा ५४ सविष्यंत्यथपाखंडाःकपालक्षिप्तवस्तथा धर्मविध्वंसशीलाश्चद्विजानांविप्र
सत्तमाः ५५ शूद्राधर्मान्प्रवक्ष्यंतिप्रव्रज्यालिंगिनोधमाः एतेचान्येचबहवःपाखंडाविप्रसत्त
माः ५५ ब्रह्मणाःक्षत्रियावैश्यासविष्यंतिकलौयुगे गीतवाद्यरताविप्रावेदवादपरांमुखाः
५६ सविष्यंतिकलौप्राप्तेशूद्रमार्गप्रवर्त्तिनः अल्पद्रव्यार्थलिंगार्थाहंकारदूषिताः ५७
हस्तरिक्तेनदातारोसविष्यंतिकलौयुगे प्रतिग्रहपरानित्यं जगद्वाम्नाकुशीलिनः ५८ अ
स्तुतिःपराःसर्वपरनिंदापरास्तथा विश्वासहीनाःपिशुनोवेदवेदद्विजादिषु ५९ असै
स्कृतोक्तिवक्तारोचकुटुंबरतास्तथा परमायुश्चसविताद्यावर्षाणिषोडश ६० ततःप्राणा
न्प्रहास्यंतिकष्टाकष्टात्मागते पंचमेवाथषष्टेवावर्षेकन्याप्रसूयते ६१ सप्तवर्षाष्टवर्ष
श्चप्रजाःसंतिनरास्तथा स्वकर्मत्यागिनःसर्वेकृतघ्नाःसंन्नवत्तयः ६२ पालकापिशु
नाश्चैवसविष्यंतिकलौयुगे परापमाननिरताआत्मस्तुतिपरायणाः ६३ परस्वहरणे

DR. BHAU DAJI MEMORIAL

पापचिंतकाःसर्वदाजनाः निंदांकुर्वंतिसततंपित्रमात्रसुतेषुच ६४ यदंतिचाचाधर्मेणचेतसा
कपलोलुपाः धनविद्यामदोन्मत्तासर्वदुःखपरायणाः ६५ व्याधितस्करदुर्भिक्षैःपीडिता
अपिदुःखिताः प्रव्रज्यांतितथारण्यंविचार्यचसुदुःखिताः ६६ खादयंतिप्रयत्नेनस्वदो
षंपापकर्मिणः स्वमायादुष्टतासम्यग्विवदंतिनरधमाः ६७ धर्ममार्गप्रणेतारंतिरस्कु
र्वंतिपापिनः निशिष्योनगुरुःकश्चिन्नपुत्रोनपितातथा ६८ नभार्यानपतिश्चैवसावि
तात्रसंकरे कलौयुगेकरिष्यंतिधनाढ्याअपियाचकाः ६९ रसविक्रयिणश्चैवधर्म
शास्त्रविनिंदकाः शूद्रवत्याचजीवंतिद्विजानरकगामिनः ७० अनावृष्टिभयत्रासाग
ताःसक्तदृष्टयः सावष्यंतिनराःसर्वेक्षुत्क्षुद्भयकातराः ७१ कंदमूलफलाहारास्ता
पसाइवमानवाः आत्मानंरक्षयिष्यंतिअनावृष्ट्यादिदुःखिताः ७२ कलौसर्वेसविष्यंति
स्वल्पस्वार्थाबहुप्रजाः स्त्रीशूद्राःपाखंडपरावेश्यालावण्यशीलिनः ७३ श्रुतिवाक्य
मनादृत्यसदास्वगृहतत्पराः दुःशीलादुष्टशीलेषुकरिष्यंतिसदास्पृहां ७४ असदृत्ता

भविष्यंति पुरुषेषुकुलांगनाः पुरुषामृतऋषिष्योदहसंस्कारवर्जिताः ७५ चाचालाश्चपक्षिष्यं
ति कलौप्राप्तेतियोषितः नगरेषुचग्रामेषुप्राकारादिषुयेनराः ७६ चोरादिभयभीताश्चकष्ट ॥नारदी॥
यंत्राणिकुर्वंते दुर्भिक्षकरपीडानिरंतरोपद्रुताजनाः ७७ लोधूमांनयवानायंदेशंयास्यं
ति दुखिताअनिधायहृदिकर्माणिप्रपुनंतिवचःशुभै ७८ स्वकार्यसिद्धिपर्यंतंबंधुत्वंकुर्व
तेजनाविभवाश्चापिमित्रादिवहंसंबंधयंत्रिताः ७९ अर्थोपाधिनिमित्तेनशिष्यान्म
यहंतिसिद्धयेउत्साद्यमपिपाणिभ्यांशिरःकंडूयतेस्त्रियः ८० कुर्वंतोगुरुसच्छ्रूणांमा
नमेत्यंतनादृताः पाशजालेननिरताः पारवेउजनसंगिनः ८१ यदाद्विजाभविष्यंतित
दाकलेर्गतः कलिः यदायदानयेनोक्तंनहोष्यंतिद्विजातयः ८२ तदातदाकलेर्वीर
नुमेयाविचक्षणैः अधर्मवर्धर्मवितावालमृत्युरपिद्विजाः ८३ सर्वधर्मेषुनष्टेषु या
तिनिःश्रीकरोजगत् एवंकलेःस्वरूपंचकथितंद्विजसत्तमाः ८४ हरिभक्तिपराणांच ॥१४१॥
कलिर्बाधतेक्वचित् तपःपरंकृतयुगेत्रेतायांज्ञानमेवहि ८५ द्वापेज्ञानमेवाहुः

दानमेवकलौयुगे यत्कृतेद्यायिभिर्विधैस्त्रेतायांद्वापरेर्चनात् ८६ द्वापरेतत्त्रमासेनअहोरात्रेण
तत्कलौ ध्यायन्कृतेयज्ञैस्त्रेतायांद्वापरेर्चनात् ८७ यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेश
वं अहोरात्रेहरेर्नामकीर्तयंतिचयेनराः ८८ कुर्वंतिहरिपूजांचनकलिर्बाधतेहितान् हरिना
मपरायतु घोरेकलियुगेद्विजाः ८९ नमोनारायणेतिमंत्रंयेकीर्त्तयंतित्वयेद्विजाः ९० निष्का
मवासकामावानकलिर्बाधतेहितान् ९१ तएवकृतकृत्याश्चनकलिर्बाधतेहितान् शि न्
वपूजापरायतु शिवनामपरायणाः ९२ तएवशिवतुल्याश्चघोरेकलियुगेद्विजाः
समस्तजगदाधारे परमात्मास्वरूपिणं ९३ घोरेकलियुगप्राप्तेविष्णुध्यानान्नसीदति प
रमाक्षप्रशेषस्यजगतामादिकारणं ९४ शरण्यंशरणंयातोगोविंदेनावसीदति हरस्य
चप्रशेषेचहरिश्चावतांद्विजाः ९५ नमादिदेवमजरंनरोध्यायेनसीदति अहोतीवस
ख्यागम्यस्तनकदाकश्चावाचकाः ९६ घोरेकलियुगप्राप्ते सर्वधर्मविवर्जिते न्यूनातिरिक्त
नामेहिः कलौवेदोक्तकर्मणां ९७ हरिस्मरणमेवात्रसंपूर्णफलदायकं हरेकेशवगोविंदा

वासुदेवजगन्नाथ ९८ इतीरयेत्तेयेनिर्त्यंनहिताबाधतेकालः शिवशंकररुद्रेशानीलकंठात्रिलोच
ना ९९ इत्यष्टोत्तरशतं १०० महादेवविरूपाक्षगंगाधरमृडाव्यय इतीरयेत्तेयेनित्यंकृतार्थानात्रसंश ॥नार०॥
यः १ जनार्दनजगन्नाथपीतांबरधराच्युत इतीर० २ संसारस्मरणंलक्ष्यपरदारधनादयः
घोरकलियुगेप्राप्तेहरिभक्तिःसुदुर्लभा ३ सनत्कुमारउवाच सत्यमुक्तंमहाभाग मुन्नकारु
ण्यवारिधे श्रुतंश्रुणुष्वविप्रेंद्रतथापिवदतोवच ४ त्वमेवमुनिशार्दूलपाषंडावेदनिंदकाः
सम्यक्श्रद्धाविहीनाश्च इतिपूर्वंत्वयोदितं ५ कलौवेदान्धर्मश्चनश्येतीतित्वयोदि
तं अधर्मनिरतानांचयातनाश्चप्रकीर्तिताः ६ घोरकलियुगप्राप्तेवेदमार्गबहिष्कृतेनरेउत्ते
प्रसिद्धत्वे सर्वेषांचप्रकीर्तिते ७ घोरेकलियुगेब्रह्मन् जनानांपुण्यकर्मणां मनश्शुद्धिविहीना
नांनिष्कृतिश्चकथंभवेत् ८ मनःशुद्धिविहीनत्वाद्द्विजादीनांचसत्तम ~~नरस्वाच साधु~~
~~साधुमहाभाग लोकानुग्रहतत्परः~~ ९ स्वकर्मणिनसिध्येतिसेषांकागतिरुत्तम १० नारद ॥१४२॥
उवाच साधुसाधुमहाभागलोकानुग्रहतत्परः ११ उपायंतंवक्ष्यामि शृणुष्वसुसमाहितः

वक्ष्यामिसमासेन सर्वशास्त्रेषुनिश्चितं १२ गुह्याद्गुह्यतरंचैव सर्वलोकोपकारकं देवाचीनामिदंसर्वंज
गत्स्थावरजंगमं १३ यथैवप्रेरितंयेनतथैवयतेजगत् शक्तितःसर्वकर्माणिवेदोक्तानिसमाचरेत्
१३ नान्यथेन्महाविष्णोर्नारायणपरायणः समर्पितानिकर्माणिमहाविष्णोःपरात्मनः १४ संपूर्णतो
प्रत्यांत्येव हरिस्मरणमात्रतः घोरेकलियुगप्राप्तेहरिरेवपरागतिः १५ महाविष्णुमर्यंलोकेहरिसाक्ष
कलौयुगेहरिस्मरणपराणांवेदेहेपापंनजायते १६ हरिस्मरणनिष्ठानांशिवनामपरात्मनां सद्यःसि
ध्येतिकर्माणियोनिसंपूर्णतांद्विजाः १७ अहोसौभाग्यमहोसौभाग्यंहरिपूजारतात्मनां त्रिदशैरपिपू
ज्यंतेकिमन्यैर्बहुभाषितैः १८ तस्मात्सर्वसमस्तलोकानांहितमेवमयोच्यते हरिनामपरान्मर्त्यान्नकलि
र्बाधतेक्वचित् १९ हरेर्नामैवनामैवनामैवममजीवनं कलौनास्त्येवनास्त्येवनास्त्येवगतिरन्यथा २०
सूतउवाच एवंसनत्कुमारस्तुनारदेनमहात्मनः सम्यक्प्रश्नोदितस्सद्यः पर्णीकरतिमायेयौ २१ तस्मा
च्छ्रुणुष्वविप्रेंद्रावहितेनांतरात्मना प्रयातिपरमंस्थानंपुनरावर्तिदुर्लभं २२ घोरेकलियुगेप्राप्तेहरि
नामपरायणाः समस्तपापनिर्मुक्ताःयांतिपरमांगतिं २३ हरिपूजापराणांतुशिवपूजापरात्म
नां न्यूनातिरिक्तनांनस्याद्भवकर्मसपेक्षिता २४ सकृदुच्चारयेद्यस्तुहरेर्नामकलौयुगे ॥ते

तेकृतार्थामहात्मानःतेषांनित्यंनमोनमः २५ हंततेतद्वःसमाख्यातंनारदेनप्रभाषितं सनत्कुमारमुन
योबृहन्नारदसंज्ञं २६ सर्वपापहरंपुण्यं सर्वदुःखविनाशनं समस्तपुण्यफलदं सर्वयज्ञफलप्रदं २७॥ ॥नारा॥
यःपठेत्रचिबुधाःश्लोकंश्लोकार्धमेवच तस्यैषांपापबंधस्तुकदाचिदपिनायते २८ येचात्राध्यायपठ
कुर्युःसकृदप्युत तेयांसिद्धिबुधश्रेष्ठाज्योतिष्टोमफलंश्रुणु २९ अहन्यहनिगोविंदंतन्मंत्रेणनशुध्व
तोकिंपुत्रदारैःकिंस्वर्गैःकिमत्रयत्रचौघवैः ३० रात्रिजन्मार्जितैःपापैःसद्यएवविमोचिताः सहस्रकु
लसंयुक्ताःप्रयांतिपरमंपदं ३१ किंतीर्थैर्गोप्रदानैर्वा किंतपोभिःकिमध्वरैः अहन्यहन्यनिशंविं
देत्कीर्तयेत्तच्छृणुवतो ३२ एतत्सवित्रमारोग्यंधन्यंपुत्र्यंप्रजनाशनं एषांगृहेपुस्तिखितंदृश्यते
तत्फलंश्रुणु ३३ नबाधतेगृहंस्तत्रनचोरादीनोभयंतथा गवांकोटिसहस्रंतुयोददातिकुटुंब
विने ३४ नचाग्निबाधतेतत्रनचोरादिभयंतथा तत्फलंसमवाप्नोतिदशाध्यायपरायणाः यस्त
ष्ठतेशास्त्रंशृणुयाद्विष्णुतत्परः ३७ तस्यपुण्यफलंचस्यं श्रुणुध्वंसुसमाहिताः रात्रिजन्मार्जि
तैःपापैःसद्यएवविमुच्यते ३८ रात्रेवंशासमंत्तस्तुदेहांतेमोक्षमाप्नुयात् यःपठेत्प्रातरुत्था
यएतदत्रश्लोकविंशतिं ३९ ज्योतिष्टोमफलंतेषां गंगास्नानंदिनेदिने एतत्सवित्रमारोग्येन ॥१४३॥

नवाचेदुष्कृतस्यनो ४० नीचासनगतावासर्वंश्रुणुयादिदमुत्तमं एतत्सुराणश्रवणमिहामुत्रसुख
प्रदं ४१ वदतांश्रुण्वतांसद्यःसर्वपापप्रणाशनं सेगद्वायदिवामोहाद्येश्रुण्वंतीदमुत्तमं ४२
तेसर्वपापनिर्मुक्ताःयांत्यंतिपरमांगतिं ॥ ॥इतिश्रीबृहन्नारदीयपुराणेअष्टत्रिंशोध्यायः
॥श्रीकृष्णार्पणमस्तु॥ ८१ ८२ ॥३॥ क्षयनामसंवत्सरेउदगयनेग्रीष्मर्तौआषाढमासेशु
क्लपक्षेदशम्यांसोमवासरेशोधितंलिखितंपुस्तकं ॥स्वार्थंपरोपकारार्थं॥ ८८८८
८८८८


॥श्री॥ हरिवंशपुराणे भविष्यपर्वणि कंसमाहात्म्ये॥
॥१४४
116/1
DR. BHAU DAJI
MEMORIAL